ITHI VIGRAHA SAMGRAHA



BY

GOVINDAPURAM

ANNASASTRI

ALIAS

MAHADAVA SURI

LATE SANSKRIT PANDIT IN THE KUMBAKONUM AND MADURA GOVT. COLLEGES, AT PRESENT SANSKRIT PANDIT OF THE NATIVE COLLEGE MADURA.

WITH

ENGLISH TRANSLATION

KUMBAKONUM:

"SREE VIDYA PRESS"

1891.

Copy right.

PRICE Rs. 1—2—0 POSTAGE EXTRA.

॥ वृत्तिविग्रहसंग्रहः ॥

अयं

श्रीवत्सकुलजलधिकौस्तुभमणेः सर्वतंत्रस्वतन्त्रस्य

श्रीवासुदेवयज्वनः पौत्रेण श्रीधर्मराजसूरेः

पुत्रेण विजयलक्ष्मीगर्भसंभूतेन

महादेवसूरिणा विरचितः

बि ए - बिरुदशालिभिः स्वतनूजन्मस्वछात्रप्रभृतिभिः

आंगलभाषया विवृतिं प्रापितः

भट्टश्री बालसरस्वती पण्डितनारायणसुदर्शनेन

परिष्कृतः

कुंभघोणस्थापितश्रीविद्यामुद्राक्षरशालायां

मुद्रितश्च समुल्लसातितमाम्

१८९१

॥ भूमिका ॥

आर्यशिखामणयः ! इह खलु सत्स्वपि रामकृष्णभाण्डार
दिकृतेषु सहांगलविवृतिषु कतिपयेषु कालितनामक्रियापदव्याव्रि
क्रियाविभागविताँनेषु सहोदाहरणानुबन्धेषु प्रबन्धेषु संग्रहेण
ल्युत्पत्तिसाधनीभूतवृत्तिविग्रहव्यूहविज्ञानमधिजिगांसमानानामम
तरामकिञ्चित्करा इति विचार्य चिरमिदमरचयमनतिचिराद्दृ
ग्रहसंग्रहम् । यत्र किल पार्थक्येन पठतां गैर्वाणीमुत हौणीं वाणी
योगायेयं भवतिति, संस्कृते सकारिकं सविवरणं सहोदाहरणञ्च,
देव हौण्याञ्च निक्षिप्तमिति मा स्म प्रसाङ्क्षीत् प्रेक्षावतां संस्कृतांग
द्विस्त्रिरुक्तिशंकेति दिक् ।

यत्र च प्रवहतीदृशी विषयानुक्रमणिका.

कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाणां
पञ्चानां वृत्तीनां अतिसंक्षेपतः स्वरूपनिरूपणम्

इह खलु नामाख्यातनिपातोपसर्गभेदेन अस्ति तावच्चतुर्विधं पद
तत्र प्रायोनिपातोपसर्गयोर्नामाख्यातगुणीभूतत्वेन अव्युत्पाद्यतया
वर्जयित्वा नाम आख्यातञ्च व्युत्पाद्यामिति विदितमेतत् ।

यत्रचैवमभियुक्ताः

चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः ।
क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः ॥
तयोरर्थाभिधाने हि व्यापारो नैव विद्यते ।
यदर्थद्योतकौ तौ तु वाचकस्स विचार्यते ॥ इति ॥

नामपदं पाकः यागः इत्यादि आख्यातपदञ्च पचति - यजति - इ
दि निपाताश्च च वा इत्यादयः उपसर्गाश्च प्र परा इत्यादयः ।

व्युत्पादनञ्च प्रकृतिप्रत्ययविवेचनम् ॥

नाम्नां आख्यातानाञ्च धातुरेव प्रकृतिः ।

अतएव शब्दयोनिश्च धातवइत्यमरसिम्हः ।

शब्दयोनिः शब्दप्रकृतिरित्यर्थः ।

ऋ धातुः पच्, यज्, इत्यादिर्भगवता पाणिनिना उपदिष्टः तेभ्य पाकः यागः इत्यादि नामपदम् पचति, यजति इत्याद्याख्यातपदञ्च यते ।

इत्थञ्च धातुवृक्षस्य नामाख्यातरूपे द्वे शाखे भवतः ।

॥ १ ॥ कृद्वृत्तिस्वरूपम् ॥

धातुभ्यः कर्त्तरि, कर्मणि, भावे, करणे, अधिकरणे, क्वचित्संप्रदानयोश्च ण्वुल्तृजादिषु कृत्संज्ञकेषु प्रत्ययेषु सत्सु प्रातिपदिकसंज्ञाद्वारा विभक्तौ नाम्नां उत्पत्तिः यथा भावे घञ् पच् = पाकः, यज् = यागः, करोतीति कर्त्ता, कारकः कर्त्तरि ण्वुल्तृचौ इति । इयमेव आद्या कृद्वृत्तिः ।

॥ २ ॥ तद्धितवृत्तिस्वरूपम् ॥

तेभ्यः (प्रयोगेभ्यः) हितः तद्धितइति पदार्थः ॥

, उपगुगर्गनडादिभ्यः नामपदेभ्यएव अण्यञ्फगादिषु अपत्यातद्धितप्रत्ययेषु सत्सु औपगवः, गार्ग्यः नाडायनः इत्यादि जायइयमेव द्वितीया तद्धितवृत्तिः ।

॥ ३ ॥ समासवृत्तिस्वरूपं ॥

: नामपदयोः क्वचित् बहूनां च समसनं एकीकरणं यत् तदेव प्तः ।

॥ पूर्वं भूतः भूतपूर्वः ।

कृष्णस्य समीपं उपकृष्णं ।

नीलं उत्पलं नीलोत्पलं ।

राज्ञः पुरुषः राजपुरुषः।
पीतं अंबरं यस्य सः पीतांबरः ।
रामश्च लक्ष्मणश्च रामलक्ष्मणौ ।
इत्यादिः ।

इयमेव तृतीया समासवृत्तिः ।

॥ ४ ॥ एकशेषवृत्तिस्वरूपम् ॥

द्वयोः बहूनां वा मध्ये एकः शिष्यते इत्यतः एकशेषः ॥ यथा रामश्च, रामश्च, रामौ ॥ रामश्च, रामश्च, रामश्च, रामाः ॥

इयमेव चतुर्थी एकशेषवृत्तिः ।

॥ ५ ॥ पञ्चमी सनाद्यन्तवृत्तिस्तु तिङन्तकाण्डशाखाभेदः तत्सर्वं उपरिष्टात् स्फुटीकरिष्यते

इत्थं कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तय तत्र कृद्वृत्तेः प्राथम्येपि नाम्नामापाततोज्ञाततया समासवृत्तेरादाव वसज्जिज्ञासाविषयतामालोच्य यथाकथञ्चिदयं क्रमः आदृतइति यम् ॥

INTRODUCTION.

Here is undertaken a brief survey of the five ttis viz; Krit, Tadhita, Samasa, Ekasesha and adyanta dhatu.

Words are of 4 kinds—Nouns or names, verbs, ticles and prepositions. As particles and pre- itions generally come under the first two classes, l as they are further underivable, we are here con- ned with the formation of only nouns and verbs. us although there are 4 kinds of words; we are y concerned with two, nouns and verbs: and not h particles and prepositions.

Examples of nouns— पाक cooking; याग sacri- fice.

Examples of verbs— पचति he cooks यजति he sacrifices.

Examples of Nipata or Particles तु, च, वा &c.

Examples of Prepositions प्र, परा &c.

Vyutpadanam or Derivation is the tracing of e radical and formative elements: the radical ele- nt of nouns and verbs is called a Dhatu or a rbal root. Hence it is stated in Amara, that verbal ots are the origin of words.

Examples of verbal roots पच्, to cook; यज् to crifice, and such others as are enumerated by ini.

From these are derived पाक cooking, याग sacri- e, which are called nouns or namapadas; and also ति he cooks, यजति he sacrifices, which are called

verbs or Akhyatapadas. Thus Namapada and Akhy tapada are the two branches of the tree called Dha or verbal root.

1. *Krit*. Formative elements called *krit* a affixed to verbal roots in a variety of senses to deno the agent or object of an action or the action i self or instrument place &c. or sometimes to conv a dative or Ablative signification. These *krit* suffix convert a root into what are called Pratipadik which are declinable.

Examples कर्ता, कारकः from कृ to do, denote t agent. पाकः from पच् to cook, and यागः from य to sacrifice denote the action &c.

This is what is called the Kridvritti.

2. *Tadhitavritti*. Formative elements call Tadhita such as अण्, यञ्, फक् &c. (which are affix only to nouns or Namapadas) affixed to such words उपगु, गर्ग, नड &c. form words such as औपगव, गार्ग्य, ना यन &c.

This is the second vritti called the Tadhi vritti.

3. Samasa is the compounding together of 2 more nouns or Namapadas, and this is the 3rd vrit

पूर्वं भूतः भूतपूर्वः।
कृष्णस्य समीपं उपकृष्णम्।
नीलं उत्पलं नीलोत्पलं।
राज्ञः पुरुषः राजपुरुषः।
पीतं अम्बरं यस्य सः पीताम्बरः।
रामश्च लक्ष्मणश्च रामलक्ष्मणौ।

4. *Ekaseshavritti*, when of 2 or more words co

ounded together only one word is retained.

रामश्च रामश्च रामौ रामश्च रामश्च रामश्च रामाः

This is the 4th vritti called Ekasesha vritti.

5. The fifth vritti called the Sanadyantadhatu-itti belongs to the chapter on verbal forms. This ill appear clearly later on.

Although kridvitti here stands first students howing as they do words by themselves without ference to their derivation generally desire to know mething about samasa first. Hence that vritti is re first taken up.

ERRATA.

Page	Line	Read	Instead of
4	6	था	या
7	20	तिष्ठद्धु	तिष्टद्धु
,,	21	आयतगिवम्	आयतगिव
9	1	तृ	त्र
13	5	पीतः	पतिः
24	15	अनश्वः	अनश्वः
,,	18	ऊरीकृत्य	कृत्यः
28	20	उपहूतपशुः	पशु
34	22	एतद्	ऐतद
43	3	त्वतः	ततः
48	12	वन्या	वन्य
51	13	त्वङ्मयम्	त्यङ्मयम्
55	15	हैमन्ताः	हैमन्तः
56	8	दागतः	दागतम्
68	3	स्वाप्तेयम्	स्वापेयम्
72	10	प्रास्थिकम्	ग्रास्थिकम्
79	21	स्त्रैणं	स्त्रौणं
,,	,,	पौंस्नं	पौंस्नं
80	13	य	यक्
34	2	समासवृत्तौ	——
38	6	प्रतिष्ठते इति	तीति
,,	11	कर्त्तव्यं	कर्त्तव्य
,,	29	उत्पिबः	उत्षिबः
91	5	दर्शनीयमानी	मानि
91	11	भवेयुः	भवेयः
96	17	रंभयति	रभयति

PAGE	LINE	READ.	INSTEAD OF
17	20	16	15
25	22	falcon	Jalcon
29	23	fallen	follen
33	25	a female	female
35	21	significance	signifigance
,,	19	Tadhitavritti	Thathithavirthi
,,	20, 25	Tadhita	Thathitha
36	16	Do.	Do.
46	14, 17	Tadhitavritti	Thathithavrithi
49	18	Vetasa	Vethasa
51	20	faeces	feaces
53	15	Bhrashtra	Brrshtra
54	25	Vasanta	Vasantha
55	18	or	of
56	16	Tatpurusha	Thathpurusha
57	17	Born	Borns
60	11	Thagadhikara	Tagadhikara
65	16	Do.	Do.
,,	17	Yadadhikara	Yathathikara
67	19	One's	Ones
68	22	Yat	Yath
70	10	Tila	Thila
73	23	denotes	denote
74	13	Bista	Bistha
,,	24	Vata	Vatha
,,	25	Pitta	Pitha
,,	27	Vata Pitta	Vatha Pitha
75	21	Drona	Throna
,,	22	Patra	Pathra
76	15	Drona	Throna
79	13	Ritu	Rithu
80	10	magnificence	magnificience
81	10	son's	sons
,,	,,	grandson's	grandsons
84	10	causes	Cause
,,	11	makes	make
,,	13	surrenders	Surrender
,,	13	separate	seperate
,,	21	Avyayibhava	Avyayibava
,,	,,	Samasantas	Samanthas
,,	22	Sarad	Sarada
84	26	Samidh	Samith
,,	28	Tatpurusha	Thathpurusha
86	24	Samasanta	Samasantha
89	17	God	Godson
90	12	Passing	Puping
93	13	devise	device

॥ श्रीः ॥

॥ वृत्तिविग्रहसंग्रहप्रारम्भः ॥

पुङ्गवपुङ्गवकेतोरङ्गजमङ्गजगुरोर्गिरागम्यम् ।
कुञ्जरकुञ्जरवदनं वन्देऽवं देवसार्वभौममहम् ॥
श्रीवत्सान्वयविख्यातः सद्वृन्दावनलीलकः ।
रुक्मिणीराधिकाराध्यो वासुदेवः स्मृतो मुदे ॥
कौशल्यं कलयति काव्यशास्त्रजाले
कालुष्यं धुवति धियश्च यत्प्रबोधः ।
तत्ताद्रग्बहुविधवृत्तिविग्रहाणां
तन्तन्ये विशदमतीव सङ्ग्रहं तम् ॥
पाणिन्यादिभिराचार्यैश्शब्दशास्त्रप्रवक्तृभिः ।
भणिता वृत्तयो या हि विशिष्टैकार्थबोधिकाः ॥

I salute the Emperor of Gods who is the protector (of all), who has the face of the best of elephants who is the son of the God (Siva) of the bull flag, and who is beyond the power of (even) Vishnu's words (to describe).

I recite mentally the name of Vasudeva, who is well-known by the mark Srivatsa famous in the family of Srivatsa), who delights in the Brindavana, (with whom it is a pleasure to protect the crowds of good people,) and who is served by Rukmini and Radha for (to obtain) felicity.

I write this short but clear treatise on Vrittis and Vigrahas, a knowledge of which makes (one) skilful in literature and Sastras, and destroys the opacity of the mind.

समासा एकशेषाश्च तद्धिताश्च कृतस्तथा ।
सनाद्यन्ता धातवश्च ता एवं पञ्चधा मताः ॥
वृत्त्यर्थबोधकपदसमूहो विग्रहो मतः ।
स्वपदोऽस्वपदश्चेति स एष द्विविधः स्मृतः ॥
समासान्तर्गतपदैः प्रथमः कथ्यते बुधैः ।
समासान्तर्गतपदसमानार्थैर्द्वितीयकः ॥
केवलश्चाव्ययीभावस्तथा तत्पुरुषोऽपि च ।
बहुव्रीहिर्द्वन्द्व इति समासाः पञ्च सम्मताः ॥
प्रथमः केवलः शुद्ध इवार्थविषयो द्विधा ।
विभक्तिलोपालोपाभ्यां शुद्धोऽपि द्विविधो भवेत् ॥
तत्र विभक्तिलोपे शुद्धः केवलसमासो यथा ॥ पूर्वं भूतः भूतपूर्वः ॥

The Vrittis are said by Panini and other grammarians to be complex formations the whole of which alone can give a sense. These are 5 in number, viz Samasa, Ekasesha, Tadhita, Krit, and Sanadyantadhatu. Vigraha means the collection of words or a sentence which indicates the meaning of a Vritti: and Vigraha is of two kinds,—Swapada and Aswapada. The first (swapada) is made up of words which actually form the compound, and the 2nd (Aswapada), of words having the same meaning as those making up the compound.

Samasa.

Samasas are of 5 kinds; viz:–Kevala, Avyayibhava, Tatpurusha, Bahuvrihi and Dwandva.

Kevalasamasa.

Kevala is of 2 kinds:-Suddha-Kevala and Ivartha. Kevala; and Suddha is subdivided again into 2 classes by the omission or otherwise of the case-termination

न एकः नैकः ॥ विभक्त्यलोपे स यथा ॥ वागर्थौ इव वागर्थौ-
विव ॥ इवार्थविषयो यथा ॥ काकागमनमिव तालपतनमिव काकता-
लम् ॥ इत्यादिः ॥ इति केवलसमासाः ॥

॥ अथाव्ययीभावाः ॥

द्विधा स्युरव्ययीभावा नित्यानित्यत्वभेदतः ।
अव्ययानव्ययपदपूर्वा नित्या अपि द्विधा ॥
अर्थविशेषविधानादव्ययपूर्वा दशाष्ट च भवन्ति ।
अन्येऽनव्ययपूर्वा स्वय इति विद्वद्भिर्निगदितं नित्यान् ॥
मध्यं विभक्तिः सामीप्यसमृद्धी ऋध्यभावकः ।
अर्थाभावात्ययासम्प्रत्येवं शब्दप्रकाशनम् ॥
पश्चाद्यथानुपूर्व्याणि यौगपद्यं च तुल्यता ।
सम्पत्तिसकलत्वान्ता अवधारणमित्यपि ॥
एतदर्थाव्ययानि स्युर्यावदेवावधारणे ।
तत्र मध्यार्थेऽव्ययीभावो यथा ॥ दिशयोर्मध्यं अपादिशम् । विभक्त्य-

---

Examples of Suddha Kevala Samasa in which the case termination is dropped—भूतपूर्वः—नैकः Where the case termination is not dropped—वागर्थाविव. Example of Ivartha Kevala; काकतालम्.

Avyayibhava.

Avyayibhavas (compounds forming indeclinables) are of two kinds:—Nitya and Anitya. Nitya is divided into Avyayapurvapada and Anavyayapurvapada, according as an Avyaya forms the first part of the compound or not. These are 18 subdivisions of Avyayapurvapadas and 3 of Anavyayapurvapadas making 21 of *Nityas*, according to the different meanings conveyed. Examples;-Avyayapurvapadas. 1. अपदिशं, between two cardinal points.

र्थे यथा ॥ हरौ इति, अधिहरि ॥ गोपे इति, अधिगोपम् ॥ समीपार्थे यथा ॥ कृष्णस्य समीपं उपकृष्णम् ॥ ऋद्धेराधिक्यं समृद्धिः ॥ तत्र यथा ॥ मद्राणां समृद्धिः सम्मद्रम् ॥ ऋद्धेरभावः व्यृद्धिः ॥ तत्र यथा ॥ यवनानां व्यृद्धिः दुर्यवनम् ॥ अर्थाभावे यथा ॥मक्षिकाणां अभावः निर्मक्षिकम् ॥ अत्यये यथा ॥ हिमस्यात्ययः अतिहिमम् ॥ असम्प्रत्यर्थे यया । निद्रा सम्प्रति न युज्यते इति अतिनिद्रम् । शब्दप्रादुर्भावे यथा ॥ हरिशब्दस्य प्रकाशः । इतिहरि ॥ पश्चादर्थे यथा ॥ विष्णोः पश्चात् अनुविष्णु ॥ यथार्थे ॥

योग्यता चैव वीप्सा च पदार्थानतिवर्तनम् ।
सादृश्यमिति भेदेन यथार्थोऽयं चतुर्विधः ॥

तत्र योग्यार्थे यथा ॥ रूपस्य योग्यं अनुरूपम् ॥ वीप्सार्थे यथा ॥ अर्थं अर्थं प्रति प्रत्यर्थम् ॥ पदार्थानतिवृत्तौ यथा ॥ शक्तिमनतिक्रम्य, यथाशक्ति ॥ सादृश्ये यथा ॥ हरेस्सादृश्यं, सहरि ॥ आनुपूर्व्यार्थे यथा ॥ ज्येष्ठस्य अनुपूर्व्येणेति, अनुज्येष्ठम् ॥ यौगपद्यार्थे यथा ॥ चक्रेण युगपत् सचक्रम् ॥ सादृश्यार्थे यथा ॥ सदृशः सख्या ससखि ॥ सम्पत्त्यर्थे यथा ॥ क्षत्राणां सम्पत्तिः सक्षत्रम् ॥

ऋद्धेरधिकता या सा समृद्धिरिति भण्यते ।
अनुरूप आत्मभावः सम्पत्तिरनयोर्भिदा ॥

साकल्यार्थे यथा ॥ तृणमप्यपरिवर्ज्य सतृणम् ॥ (अत्ति) । अन्तार्थे

---

2. अधिहरि, in Hari. 3. उपकृष्णम् near Krishna. 4. सम्मद्रम् the prosperity of the Madras. 5. दुर्यवनं, the decline of the Yavanas. 6. निर्मक्षिकं, without flies. 7. अतिहिमं, absence of snow. 8. अतिनिद्रं, unbefittingness of sleep now. 9. इतिहरि. the shout of "Hari." 10. अनुविष्णु, after Vishnu. 11. अनुरूपं befitting (one's) form. प्रत्यर्थम्, in every object. यथाशक्ति, not beyond (one's) means. सहरि. Likeness of Hari. 12. अनुज्येष्ठं, After the elder. 13.सचक्रम्. simultaneously with the Chakra. 14. ससखि A

यथा ॥ अग्निग्रन्थपर्यन्तं अधीते, साग्नि ॥ अवधारणे यथा ॥ यावन्तः श्लोकाः, यावच्छ्लोकम् ॥

२ व्ययेतरपूर्वास्स्युर्मात्रार्थे प्रतिना सह ।
कितवव्यवहारे च परिणा सह नाम्नि च ॥

तत्र मात्रार्थे यथा ॥ शाकस्य लेशः शाकप्रति ॥ सूपस्य लेशः सूपप्रति ॥ कितवव्यवहारे यथा ॥ अक्षेण विपरीतं वृत्तं, अक्षपरि ॥ शलाकाभिर्विपरीतं वृत्तं, शलाकापरि ॥ एकेन विपरीतं वृत्तं, एकपरि ॥ द्वाभ्यां विपरीतं वृत्तं, द्विपरि ॥ संज्ञायां यथा ॥ उन्मत्तगङ्गं । नाम देशः ॥ लोहितगङ्गम् ॥

विग्रहोऽस्वपदो यस्या न स्याद्यस्याश्च विग्रहः ।
ते नित्ये सानित्या स्याद्यस्याः स्वपदविग्रहः ॥

अपदिशमित्यादावस्वपदविग्रहान्नित्यत्वम् ॥ उन्मत्तगङ्गमित्यादौ वि-

---

person resembling (his) companion. 15. सक्षत्रं The well-being of Kshatris. 16. सतृणं (अत्ति). (Eats all) including grass. 17- साग्नि studies *to the end of Agnigrantha.* 18. यावच्छ्लोकं. As far as there are stanzas.

Anavyayapurvapadas (or Avyayotarapadas) 1. words are compounded with प्रति in the sense of a little:—शाकप्रति—A small quantity of vegetables; सूपप्रति A little dholl. 2. words occur in compounds with परि in the language of gambling:—Ex अक्षपरि, Lost by the dice. 3. Some proper names belong to this class of compounds:—उन्मत्तगंगं—Name of a country.

Those compounds are called Nityas which have no vigrahas, or whose vigrahas are formed of words other than those in the compound. Anitya compounds are those whose vigrahas are formed of words contained in the compound itself. उन्मत्तगंगं &c

अहाभावान्नित्यत्वम् ॥

इति नित्याव्ययीभावा एकविंशतिरीरिताः ।
अनित्यास्सप्त तत्राद्यः पञ्चम्यन्तोत्तरः स्मृतः ॥
चतुर्धा स्यादपपरिबहिरंञ्चवन्तपूर्वकः ॥

अञ्चवन्ताः प्राक्प्रत्यगादयः । क्रमेण यथा । अपविष्णु । संसारः । अप विष्णोः ॥ परिविष्णु । परि विष्णोः । बहिर्वनम् । बहिः वनात् । प्रग्वनम् । प्राक् वनात् ॥

आङ्पूर्वपदकस्तत्र द्वितीयः परिकीर्तितः ।
मर्यादायामभिविधावित्याङ् भेदाद्द्विधैव सः ॥

क्रमेण यथा । आमुक्ति, संसारः । आमुक्तेः । आबालं, हरिभक्तिः, आ बालेभ्यः ॥

तृतीयश्चिन्हभूतार्थवाच्युत्तर इह स्मृतः ।
अभिप्रत्योराभिमुख्यद्योतिनोः पूर्वयोस्सतोः ॥

---

have no vigrahas. अपदिशं &c have Aswapada vigrahas. Thus the 21 kinds of Nityayayibhavas have been dealt with.

The Anityas are of 7 kinds:—I. compounds whose second words are in the Ablative case. In these compounds, the first word is अप, परि, बहिः, or a word ending with अञ्चु ie प्राक्, प्रत्यक् &c: Ex. अपविष्णु Away from Vishnu. परिविष्णु About Vishnu. बहिर्वनं Out of the forest. प्राग्वनं Before (there was a) forest. 2. compounds with आङ् (आ) as the first word. आ has two meanings viz 'up to.' and 'inclusive of.' आमुक्ति. (संसारः) (Family life and cares continue) up to absolution, ie, till absolution is obtained. आबालं (हरिभक्तिः) (worship of Hari) extends even to (inclusive of) children. 3. Compounds whose second words denote

सामीप्यदैर्घ्यद्योत्यन्वोः पूर्वयोस्सचतुर्विधः ।
ऋमेणयथा ॥ अभ्यग्नि ॥ शलभाः पतन्ति अग्निमभि ॥ प्रत्यग्नि ॥ शलभाः पतन्ति । अग्निंप्रति ॥ वनस्य समीपं अनुवनं अग्ननिर्गतः । वनस्य अनु वा ॥ अनुगंगं वाराणसी । गंगाया अनु । गंगादैर्घ्यसदृशादैर्घ्योपलक्षितेत्यर्थः ॥

तिष्ठद्गुप्रभृतिस्तुर्यः स्यादन्यार्थप्रधानकः ॥
यथा ॥ तिष्ठन्ति गावो यस्मिन् काले सतिष्ठद्गु । दोहनकालः । आयंति गावो यस्मिन् काले सः ॥ आयतींगवं ॥ सायङ्कालः ॥

एदन्तपूर्वपदकस्तत्र पंचमइष्यते ॥
गंगायाः पारं पारेगंगं ॥ गंगायाः मध्यं मध्येगंगं ॥

वंश्यवाच्युत्तरपदस्तत्र षष्ठो विबुध्यताम् ।
विद्याजनिभ्यां वंशस्स्याद्वंश्यस्तत्रभवो मतः ॥
यथा ॥ द्वौ मुनी वंश्यौ, द्विमुनि । व्याकरणस्य, त्रिमुनि॥

---

direction limit &c, and whose first words are अभि and प्रति both meaning in the direction of, and अनु meaning respectively, nearness and extent:-Ex अभ्यग्नि, In the direction of the fire. प्रत्यग्नि (same as above) अनुवनं Near the forest. अनुगंगं (वाराणसी (Benares is) co-extensive with the Ganges. 4. The fourth class consists of तिष्ठद्गु &c which are adjectives. तिष्ठद्गु=Time of milking. आयतींगवं Evening time. 5. The fifth class consists of compounds whose first words end in ए:—Ex पारेगंगं, the bank of the Ganges मध्येगंगं, In the middle of the Ganges. 6. The sixth class of Anityas are those whose second words mean a lineal descendant. वंश or lineage is of 2 kinds; lineage by progeny as father son &c, and lineage by learning, ie, preceptor disciple &c. वंश्य means a person in the line. Ex. द्विमुनि. One who has 2 sages as his ancestors. त्रिमुनि. That which

नद्यौवाच्युत्तरपदस्समाहारोत्र सप्तमः ।
यथा ॥ सप्तानां गंगानां समाहारः सप्तगंगं ॥ द्वयोर्यमुनयोस्समाहारः द्वियमुनं ॥

इत्यनित्याव्ययीभावास्सप्तापि परिकीर्तिताः ।
नित्यानित्याव्ययीभावमेलनेऽष्टौच विंशतिः ॥

॥ इत्यव्ययीभावाः ॥

॥ अथ तत्पुरुषाः ॥

ते समानाधिकरणा स्तद्भिन्नाइति च द्विधा ।
द्विविधेष्वादिमास्तुल्यविभक्तिवचनास्स्मृताः ॥
कर्मधारयइत्याख्यामाद्येष्वाचक्षते बुधाः ।
सकर्मधारयोद्वेधा द्विगुः केवलस्त्यपि ॥
तद्धितार्थद्विगुश्चैव तथोत्तरपदद्विगुः ।
समाहारद्विगुश्चेति द्विगुरेषत्रिधा मतः ॥

---

has 3 sages as its originators. (grammar) 7. The seventh class consists of those in which the second words are the names of rivers, and the whole compound denotes an aggregation of them. सप्तगंगं. An aggregation of 7 Ganges rivers. &c. These are the 7 kinds of Nityavyayibhavas making up the 28 Avyayibhavas together with the Nityas.

Tatpurushas.

Tatpurushas are divided into *samanadhikaranas* ie, those in which the component words are in the same case, and *Vyadhikaranas* ie those in which the words making up the compound are in different cases The Ist which is also called *Karmadharaya* is subdivided into *Dwigukarmadharaya* & *Kevala karmadharaya*.

Dwigus are of 3 kinds.— *Tadhitarthadwigu*, *Uttarapada dwigu* and *Samahara dwigu*. Examples

क्रमेण यथा ॥ षण्णां मातृणां अपत्यं पुमान्, षाण्मातुरः ॥ पञ्च गावो धनं यस्य सः, पञ्चगवधनः । पञ्चानां गवां समाहारः, पञ्चगवं ॥

नपुंसकस्समाहारो द्विगुस्सर्वत्र बुध्यतां ।
अकारान्तोत्तरपदः स्त्रीलिंगो ज्ञायतां द्विगुः ॥
अकारान्तोत्तरोप्येष पात्राद्यन्तो नपुंसकः ।
अन्नन्ताबन्तपरकः स्त्रीनपुंसकयोर्द्विगुः ॥

क्रमेण यथा ॥ पञ्चगवं, पञ्चपूली, त्रिलोकी, पञ्चवटी, पञ्चपात्रं, त्रिभुवनं, चतुर्युगं, पञ्चतक्षं, पञ्चतक्षी, पञ्चखट्वं, पञ्चखट्वी. ॥

॥ इतिद्विगुकर्मधारयः ॥ अथ केवलकर्मधारयः ॥

त्रिविधो विबुधैर्ज्ञेयः केवलः कर्मधारयः ।
विशेष्योत्तरपूर्वौ द्वावन्यस्सर्वविशेषणः ॥

---

respectively षाण्मातुरः The son of six mothers (God Subrahmanya) पञ्चगवधनः, one whose wealth consists of five cows; पञ्चगवं. A collection of five cows.

Dwigu compounds are of the neuter gender.

Exception 1. When the 2nd word ends in अ the compound is of the Fem. gender except in the case of पात्र &c when the compound is neuter.

Exception 2. Compounds whose second words end in the terminations अन् and आप् are both neuter and femenine. Examples. Rule- पञ्चगवं Exception (1) त्रिलोकी The 3 worlds. चतुर्युगं The four ages. Exception (2) पञ्चतक्षं, पञ्चतक्षी. A collection of 5 carpenters.

Kevala karmadharaya is of 3 kinds.—1. Visesheyottarapada, having an adjective first and a noun after it 2. Viseshyapurvapada, having a noun first

गुणक्रियानामजातिवाचिशब्दाश्चतुर्विधाः ।
गुणक्रियानामशब्दैः समभिव्याहृतो यदि ॥
जातिशब्दस्तदा ज्ञेयो विशेष्यस्यैव वाचकः ।
जातिशब्दस्य विरहे त्वन्यशब्देषु तेषु तु ॥
विशेषणविशेष्यार्थवाचितानियमो न हि ।
विशेषजातियोगे तु सामान्यस्य विशेष्यता ॥
विशेषणानामेवं च चातुर्विध्याच्चतुर्विधः ।
विशेष्योत्तरपदकः कर्मधारय इष्यते ॥

क्रमेण यथा ॥ नीलश्चासौ घटश्च, नीलघटः ॥ पाचकश्चासौ ब्राह्मणश्च, पाचकब्राह्मणः ॥ कैलासश्चासौ अचलश्च, कैलासाचलः ॥ पारिजातश्चासौ वृक्षश्च, पारिजातवृक्षः ॥

---

and an adjective after it. and 3. Viseshanobhayapada, where both words are adjectives.

Words are of 4 classes according as they denote a quality, an action, a name or a class. When a word of the Ist, 2nd or 3rd class is compounded with a word of the last class, the former qualifies the latter; when, however, words of the 1st 3 classes are compounded with each other, either may be taken to be the qualifying word; when, of two words forming a compound one denotes a class, and the other a subdivision of the same, the former is the noun.

Viseshyottarapada karmadharayas are of 4 classes according as the adjective denotes I. quality, 2. action, 3. a name or 4. a class. Examples respectively. नीलघटः A blue pot. पाचकब्राह्मणः A Brahmin who is a cook कैलासाचलः The kailasa mountain पारि-

शुद्धतत्पुरुषद्वन्द्वैकशेषैरुत्तरैः पदैः ।
विशेष्योत्तरपैभिः स्यात्पुनरेषचतुर्विधः ॥

क्रमेण यथा ॥ नीलघटः ॥ नीलराजपुरुषः ॥ नीलघटपटौ ॥ नील-घटौ ॥ नीलघटाः ॥

चातुर्विध्याच्च पूर्वोक्तचतुर्ष्वपि हि षोडश ।
यथासम्भवमूह्यन्तां भेदाएवं विचक्षणैः ॥

॥ इति विशेष्योत्तरकर्मधारयः ॥

विशेष्यपूर्वपदको यो भवेत्कर्मधारयः ।
सकुत्स्यमानपूर्वश्च तथोपमितपूर्वकः ॥
च्व्यर्थस्य गमकोऽभूततद्भावः च्व्यर्थउच्यते ।
चतुर्थस्त्वन्यपूर्वश्च द्वितीयो द्विविधोऽत्र तु ॥
साधारणस्य धर्मस्याप्रयोगाच्च प्रयोगतः ।

क्रमेण यथा ॥ वैयाकरणश्चासौ खसूचिश्च, वैयाकरणखसूचिः ॥

जातवृक्षः A Parajata tree. Each of the above classes has 4 subdivisions according as the 2nd word is a simple word, a Tatpurusha compound, a Dwandwa compound or an Ekasesha compound. नीलघटः &c are examples in order. Other differences like these are numerous and need no mention.

Viseshyapurvapadas. This karmadharaya is of 4 kinds:—I. Compounds whose 1st words denote censure 2. Compounds whose 1st words denote an object of comparison; 3. Compounds whose 1st words end in 'च्वि'. ('च्वि' is used to denote a new state of things different from what it was before); and 4. those whose 1st words do not come under any of the above 3 classes. In the second kind above mentioned, the similarity may be expressed or implied. Examples 1. वैयाकरणखसूचिः lit. a grammarian

पुरुषव्याघ्रइव पुरुषव्याघ्रः ॥ नासोमइव, नृसोमः ॥ गौः बृन्दारकइव, गोबृन्दारकः ॥ एवं, गोनागः ॥ गोकुंजरः ॥

शब्दाबृन्दारकोनागः कुंजरश्चेत्यमीत्रयः ।
साधारणप्रयोगेऽपि समस्यन्तइति स्थितं ॥

क्व्यर्थद्योतकः विशेष्यपूर्वो यथा ॥ अश्रेणयः श्रेणयः कृताः श्रेणिकृताः ॥ श्रेणिशब्दोहस्वान्त एव ॥

जीविनां शिल्पपण्याभ्यां समूहाः श्रेणयः स्मृताः ॥

एवं पूगकृताः ॥ निचयकृताः ॥ इत्यादयो ज्ञेयाः ॥ अन्यपूर्वो यथा ॥ पोटा च सा इभीच ॥ इभपोटा ॥ इभयुवतिः ॥ स्तोकश्चासावग्निश्च, अग्निस्तोकः ॥ मतल्लिकाचासौ गौश्च. गोमतल्लिका ॥ गर्भिणी चासौ गौश्च, गोगर्भिणी ॥

एवं विशेष्यपूर्वस्तु पञ्चधायमुदाहृतः ।
यः कर्मधारयः सर्वविशेषणकएष सः ॥

गुणशब्दः क्रियाशब्दोमिश्रशब्दइति त्रिधा ।
विशेषणविशेष्यत्वं एषुस्यात्कामचारतः ॥

गुणशब्दो यथा ॥ खञ्जकुब्जः, कुब्जखञ्जः ॥ नीलपीतः, पीत

---

who points to the sky; ie who cannot answer a question and looks up towards the sky. This is used to denote censure. 2. पुरुषव्याघ्रः A man like a tiger नृसोमः A man like the moon &c 3. श्रेणिकृताः (Artizans or traders) formed into a guild. 4. इभपोटा A she elephant अग्निस्तोकः A little fire; गोमतल्लिका The best of bulls &c.

Viseshanobhayapada karmadharayas are of 3 kinds according as the componeut words denote a quality, an action, or both. In all these compounds, either word may be taken to be the qualifying word. Examples:—खञ्जकुब्जः or कुब्जखञ्जः A lame and blind

नीलः ॥ क्रियाशब्दोयथा ॥ पाचकपाठकः , पाठकपाचकः ॥ मिश्रशब्दोयथा ॥ खञ्जपाचकः , पाचकखञ्जः ॥

पूर्वनिपातनियमात्तदनियमाच्चापि भेदविद्विबुधैः ।
निखिलविशेषणएषत्रिविधोपि पुनर्द्विधा ख्यातः ॥

क्रमेण यथा ॥ पूर्वं नीलः पश्चात् पतिः , नीलपतिः ॥ पूर्वं पाचकः पश्चात् पाठकः , पाचकपाठकः ॥ पूर्वं पाचकः पश्चात् खञ्जः , पाचकखञ्जः ॥

तस्य हि पूर्वनिपातोयस्तु ज्ञातोविशेषणत्वेन ।
पूर्वनिपातोनियतो येषां तेषां तु संग्रहः क्रियते ॥
पूर्वकालास्सर्वजरत्पुराणनवकेवलाः ।
उपमानार्थकाः पूर्वोऽपरः प्रथमएव च ॥
चरमश्च जघन्यश्च समानोमध्यमध्यमौ ।
वीरइत्यपि सर्वत्र ह्येते पूर्वनिपातिनः ॥

(man) नीलपीतः or पीतनीलः a blue and yellow (thing) पाचकपाठकः or पाठकपाचकः a cook and teacher खञ्जपाचकः or पाचकखञ्जः a lame cook.

Each of the above subdivisions of Kevala karmadharayas, consists of 2 classes viz:—Those compounds in which priority is assigned to a particular member, and those in which no such distinction is made.

Generally the adjective or qualifying word is the 1st word of the compound. The following are exceptions:—

Exception 1. Words denoting something that takes place earlier in point of time, words denoting mparison, and सर्व, जरत्, पुराण, नव, केवल, पूर्व, अपर, प्रथम, म, जघन्य, समान, मध्यम, मध्य, and वीर, always come first.

सनव्यक्तांते त्वनव्यक्तांतः पूर्वस्स्यात्तुल्यधातुकः ।
यथा ॥ कृतं च तत् अकृतं च । कृताकृतं ॥
पूज्यमानार्थकैर्योगे सन्महत्परमोत्तमाः ।
उत्कृष्टइत्यमी सर्वे शब्दाः पूर्वनिपातिनः ॥
यथा ॥ संश्चासौ वैद्यश्च सद्वैद्यः ॥ महावैयाकरणः ॥ इत्यादि ॥
पूर्वोजातिपरिप्रश्ने कतरः कतमोऽपि च ।
यथा ॥ कतरकठः ॥ कतमकालापः ॥
खलतिः पलितश्चैव वलिनोजरती तथा ।
एभिर्योगे युवा पूर्वं युवतिश्च प्रयुज्यते ॥
यथा ॥ युवखलतिः ॥ युवपलितः ॥
अजातिशब्दैः कृत्यांताः पूर्वास्तुल्यार्थका अपि ॥

Exception 2. When the past passive participle of a verb is compounded with its negative the former takes the 1st place. Ex. कृताकृतम् Done and undone.

Exception-3. सत्, महत्, परम, उत्तम, and उत्कृष्ट when compounded with a word denoting praise are always placed first. सद्वैद्यः A good physician महावैयाकरणः A great grammarian.

Exception 4. कतर and कतम when compounded with a word denoting a class or species come first. कतरकठः which of the two followers of the sage Katha. कतमकालापः which of the (three or more) grammarians of the Kalapa School?

Exception 5. युवन् and युवति are used first when compounded with खलति पलित, वलिन and जरती ex. युवखलतिः. A bald headed youth युवपलितः A grey-haired youth.

Exception 6. Words denoting equality and those

यथा ॥ भोज्योष्णं ॥ पानीयशीतं ॥ तुल्यश्वेतः ॥ तुल्यमहान् ॥ सदृशश्वेतः ॥

कुमारश्च कुमारी च पूर्वमेव श्रमणादिभिः ॥

यथा ॥ कुमारश्रमणा ॥ कुमारप्रव्रजिता ॥

तत्सर्वत्रोत्तरं यत्तु विशेष्यत्वेन मन्यते ।
क्वचित्पूर्वनिपातोऽपि विशेष्यस्येति भण्यते ॥
पापाणकेतरैः कुत्साहेतुभिः कुत्स्यमानकं ।
व्याघ्रादिभिरुपमितं श्रेण्यादिश्च कृतादिभिः ॥

---

ending in a Kritya termination when compounded with a word not denoting a class come first. Ex. भोज्योष्णं hot meals. पानीयशीतं cold drink. तुल्यश्वेतः equally white तुल्यमहान् equally great.

Exception 7. कुमार and कुमारी come first when compounded with श्रमण &c-Ex. कुमारश्रमणा. A girl mendicant. कुमारप्रव्रजिता A girl nun.

The noun or qualified word is generally the 2nd word of the compound. The following are exceptions.

Exception 1. Words denoting contempt come first when compounded with words denoting the cause of such contempt except पाप and अणक.

Exception 2. Words denoting an object of comparison are placed first when compounded with व्याघ्र &c.

Exception 3. श्रेणि &c are placed first in compounds with कृत &c.

पोटार्दिभिर्जातिवाची प्रशंसावाचकैरपि ।
विशेष्यमपि यत्तत्पाक् सर्वत्रात्र प्रयुज्यते ॥
पोटा च युवतिस्तोको गृष्टिः कतिपयोवशा ।
धेनुर्वेहद्वष्कयणीप्रवक्तृश्रोत्रियौ तथा ॥
अध्यापकश्च धूर्तश्च पोटाद्याः परिकीर्तिताः ।
मतल्लिकादयः पंच प्रशंसावाचकास्मृताः ॥
गर्भिण्या सह पूर्वः स्याच्चतुष्पाज्जातिवाचकः ।
गर्भिणीचासौ गौश्च गोगर्भिणी ॥
एतेष्वनित्यानित्यस्तु क्वचित्स्यात्कर्मधारयः ॥
कुत्सितश्चासौ राजा च ,, किंराजा ॥ एवं किंसखा किंगौः कृष्णसर्पः इत्यादिः ॥
विशेष्यलिंगवचनेसर्वत्र विहिते इह ।
क्वचिल्लिंगं च वचनं बाधितं स्यात्क्वचिद्द्वयं ॥
लिंगबाधे यथा ॥ अग्रं चासौ पाणिश्च , अग्रपाणिः ॥ एवं अग्रह-

Exception 4. The noun or qualified word is placed first when words denoting a class or species are compounded with पोटा &c or with a word denoting excellence praise as मतल्लिका &c.

Exception 5. Names of quadrupeds when compounded with गर्भिणी, come first.

The above compounds are Anityas. Sometimes Karmadharayas are also Nityas as किं राजा A bad king, किं सखा, a bad companion, किं गौः a bad cow, कृष्णसर्पः A black serpent.

In Karmadharayas, the adjective generally takes the number and gender of the noun. Sometimes one or both may be different. In अग्रं चासौ पाणिश्च-

स्तः ॥ वचनबाधे यथा ॥ शतस्य मखानां समाहारः, शतमखी ।
उभयबाधे यथा ॥ दाराश्च सा देवदत्ता च, दारदेवदत्ता ॥ इत्यादिः ॥

द्विगुस्त्रिधा षोडशस्युर्विशेष्योत्तरकेवलाः ।
तत्पूर्वकेवलाः पंच त्रिधा सर्वविशेषणाः ॥
इति ज्ञेयास्समानाधिकरणास्सप्तविंशतिः ।
अन्येपि भेदका धर्मा ऊह्या ह्येवं विचक्षणैः ॥
इति समानाधिकरणतत्पुरुषाः सप्तविंशतिः ॥

॥ अथ व्यधिकरणतत्पुरुषाः ॥

असमानाधिकरणास्ते विरुद्धविभक्तयः ।
केवलागतिपूर्वाश्च प्रादिपूर्वपदाअपि ॥
तथोपपदपूर्वाश्च ज्ञेयाइत्थं चतुर्विधाः ।
अनव्ययाव्ययपदपूर्वाद्वेधा च केवलाः ॥
सप्तम्याः प्रथमांतादिसप्तम्यंतांतपूर्वकाः ।

अग्रपाणिः the gender of the adjective is different from that of the noun. In शतस्य मुखानां समहारः- शतमुखी the number is different. In शतस्य मखानां समाहारः- शतमखी, and दाराश्च सा देवदत्ताच- दारदेवदत्ता the adjective does not agree with the noun either in gender or number. Thus the samanadhikaranatatpurushas are 27 in number made up of 3 subdivisions of Dwigu, 15 of Viseshyottarapadas, 5 of Viseshyapurvapadas, and 3 of Viseshanobhayapadas.

Vyadhikaranatatpurushas are those in which the component words are not in the same case. They are of 4 kinds viz. *Kevalas*, *Gatipurvas*, *Pradipurvas*, and *Upapadapurvas*. The 1st *Kevala* is either *Avyayapurva* or *Anavyayapurva*. The latter *Anavyayapurva* has 7 subdivisions according as the first word of thecompound is in the Nom. Acc. Ins.

षष्ठीद्वितीयोत्तरकः प्रथमापूर्वकोद्विधा ॥
षष्ठ्युत्तरस्त्वेकदेशी परिमाणीति च द्विधा ॥

तत्र एकदेश्युत्तरसमासोयथा ॥ पूर्वं कायस्य पूर्वकायः ॥ अर्ध पिप्पल्याः अर्धपिप्पली ॥ एकदेशी=अवयवी ॥

एकावयविना पूर्वमपरंचाधरस्तथा ।
उत्तरंचार्धमित्येकदेशाः पंचैव संगताः ॥
षष्ठीतत्पुरुषोह्यत्र बाधितस्त्वेकदेशिना ।
द्वितीयंच तृतीयंच तुरीयं च चतुर्थकं ॥
एषु स्यादेकदेशीवा षष्ठीतत्पुरुषोपि वा ।

यथा ॥ द्वितीयं भिक्षायाः द्वितीयभिक्षा ॥ भिक्षाद्वितीयं इत्यादि ॥

अह्नैकदेशिनासर्वएकदेशस्समस्यते ।

यथा ॥ मध्याह्नः ॥ सायाह्नः ॥

Dat. Abl. Gen. or Loc. case, and are called respectively प्रथमातत्पुरुषः &c. In Prathamatatpurushas the second member of the compound is generally a noun in the genitive or accusative case. The genitive is either Ekadesi or Parimani. Ekadesi means that of which a portion is spoken of, Parimani means that which is measured. पूर्व, अपर, अधर, उत्तर and अर्ध are the only words denoting a portion which precede an Ekadesi Ex. of Ekadesi. पूर्वकायः The fore part of the body अर्धपिप्पली half of a pepper. It will be seen that Ekadesi is an exception to shashti—tatpurusha. When द्वितीय तृतीय चतुर्थ and तुरीय are compounded with a word in the genitive case either Ekadesi or shashti tatpurusha compound can be made; as द्वितीयभिक्षा or भिक्षाद्वितीयं &c. When अहन् is the Ekadesi, Ekadesa compound alone is possible मध्याह्नः midday सायाह्न evening.

कालवाच्येव पूर्वः स्यात्परिमाण्युत्तरेत्विह ॥
मासोजातस्य मासजातः॥ संवत्सरजातः ॥ द्व्होजातस्य द्व्हजातः ॥
परिमाण्युत्तरस्यैव त्रिपदत्वं कदाचन ।
यथा द्वे अहनी जातस्य द्व्यह्नजातः ॥ द्वितीयोत्तरः प्रथमापूर्वोय-
था ॥ प्राप्तोजीविकां प्राप्तजीविकः ॥ आपन्नजीविकः ॥ जीविकां
प्राप्ता प्राप्तजीविका ॥
योद्वितीयासमासस्स्यात्सप्राप्तापन्नयोरपि ॥
यथा ॥ जीविकां प्राप्तः जीविकाप्राप्तः ॥ जीविकापन्नः
इत्येकएकदेशी च परिमाण्युत्तरोद्विधा ।
द्वितीयोत्तरएकश्च प्रथमापूर्वकागताः ॥
अथ द्वितीयातत्पुरुषोयथा ॥ कृष्णं श्रितः कृष्णश्रितः
श्रितातीतगतात्यस्तपतिताः प्राप्तइत्यपि ।
आपन्नश्चैव गम्यादिरत्र स्याद्दुत्तरं पदम् ॥
यथा ग्रामं गमी ग्रामगमी ॥ अन्नं बुभुक्षुः अन्नबुभुक्षुः

Parimani means that which is measured. It is always preceded by a word indicating time, as मासोजातस्य मासजातः a month old संवत्सरजातः a year old. द्व्हजातः 2 days old. Sometimes this compound is made up of 3 words as द्वे अहनी जातस्य - द्व्यहजातः 2 days old. Examples of Prathamapurvakas followed by a noun in the Acc. case. प्राप्तजीविकः one who has obtained a livelihood. *Dwiteeya samasa* compound may also be made with प्राप्त and आपन्न - जीविकाप्राप्तः one who has obtained a living.

Dwiteeya tatpurusha कृष्णश्रितः one who has gone to Krishna for protection. The 2nd member of this compound is generally one of the following words. श्रित. अतीत. गत. अत्यस्त. पतित. प्राप्त. आपन्न and गमी as ग्रामगमी- one

स्वयं सामीत्यव्ययं द्वे शब्दाः कालार्थकाअपि ।
पूर्वाः क्तांतमकृतिकसुबन्तोत्तरकेत्विह ॥
स्वयंकृतं सामिकृतं मासप्रमितः ॥ प्रतिपच्चन्द्रइत्यर्थः
खट्वापूर्वस्तुनिन्दायां नित्यः क्तांतोत्तरोह्ययम् ॥
यथा ॥ खट्वारूढः । जाल्मः ॥
कालास्त्वत्यन्तसंयोगे पूर्वास्युः किंचिदुत्तराः ॥
यथा ॥ मुहूर्तं सुखं मुहूर्तसुखम् ॥
क्तान्तोत्तरपदोद्वेधा तदन्योत्तरएककः ।
स्याद्द्वितीयातत्पुरुषएष च त्रिविधोगतः ॥
गुणोपसर्जनद्रव्यवाचकेन पदेन तु ।
समस्यते तृतीयांतं गुणः स्वार्थेन चेत्कृतः ॥
यथा ॥ शंकुलया खण्डः शंकुलाखण्डः ॥

---

who goes to the village. अन्नबुभुक्षुः one who likes to eat food. Past passive participial nouns being the 2nd words of this compound are preceded by the indeclinables स्वयं and सामि and words denoting time. as स्वयंकृतं. done by oneself. सामिकृतं half done. मासप्रमितः the new moon. खट्वा is always followed by a past passive participial noun and denotes censure. खट्वारूढः a low abandoned man. When indicating close connection, words denoting a portion of time followed by any word form this compound. मुहूर्तसुखं A short-lived pleasure.

Triteeya tatpurusha. A word in the instrumental case is compounded with an adjective used as a noun if the quality denoted by the latter is caused by the object denoted by the former as शंकुलाखण्डः A piece cut off with a pair of scissors.

पूर्वं चेत्कर्तृकरणतृतीयांतं भवेत्पदम् ।
क्तवत्वन्तेतरत्प्रायः कृदन्तं स्यात्तदुत्तरम् ॥

हरिणा त्रातः हरित्रातः ॥ नखैर्भिन्नः नखभिन्नः । वातच्छेद्यं तृणं । काकपेया नदी ॥

अर्थः पूर्वश्च सदृशः समऊनार्थकैरपि ।
कलहोनिपुणोमिश्रः श्लक्ष्णश्चावरइत्यपि ॥
अमी शब्दाअपि परैं तृतीया पूर्वके मताः ।

यथा ॥ धान्येन अर्थः धान्यार्थः । मासेन पूर्वः मासपूर्वः । इत्यादि ॥

संस्कारार्थकपूर्वैरन्नवाच्युत्तरं पदम् ।
मिश्रकार्थकपूर्वैत्र भक्ष्यवाचकमुत्तमम् ॥

क्रमेण यथा ॥ दध्ना ओदनः दध्योदनः । गुडेन धाना: गुडधानाः ॥

एवं तृतीयापूर्वस्तु पंचधाद्योगुणोत्तरः ।
संस्कारमिश्रकार्थेभ्यो भिन्नपूर्वास्त्रयोपरः ॥

A word in the instrumental case denoting an agent or instrument is compounded with a word ending in a कृत् termination except क्तवतु as हरित्रातः protected by Hari. नखभिन्नः Broken asunder by the nail वातछेद्य capable of being broken by the wind ie. very fragile.

अर्थः a request, पूर्वः older सदृशः similar, समः equal, words meaning 'defective', कलहः quarrel, निपुणः clever, मिश्रः mixed, श्लक्ष्णः Beautiful, अवरः inferior and other words are compounded with an instrumental before them as धान्यार्थः मासपूर्वः older by a month.

अन्न or its equivalents are the second part of compounds when the first denotes some preparation of them. Thinking that is eaten is the second part of compounds when the first denote something with what is mixed.

as दध्योदनः food prepared with curds गुडधानाः fried grain mixed with sugar.

स्याच्चतुर्थीसमासस्तु नित्योऽनित्यइति द्विधा ।
अर्थशब्देन नित्यस्तु विज्ञेयस्सर्वलिङ्गकः ॥

यथा ॥ ब्राह्मणाय अयं ब्राह्मणार्थः सूपः । ब्राह्मणाय इयं ब्राह्मणार्थी यवागूः । ब्राह्मणाय इदं ब्राह्मणार्थं पयः ॥

प्रकृतिविकृतिस्वेस्याद्नित्योन्यत्र च द्विधा ।
प्रकृत्यर्थकपूर्वस्स्याद्विकृत्यर्थोत्तरश्चसः ॥

यथा ॥ यूपाय दारु यूपदारु । कुण्डलाय हिरण्यं कुण्डलहिरण्यम् ॥

अन्यत्र स्याद्बलिहितसुखरक्षितमुत्तरम् ॥

भूतेभ्यो बलिः भूतबलिः । गोभ्यः हितं गोहितं । इत्यादि ॥

भयभीतभीतिभीभिः पंचम्यन्तं समस्यते पूर्वं ।

Chaturthitatpurushas are of 2 kinds:—

Nitya and Anitya. When the word अर्थ follows a dative the compound is Nitya and occurs in all the 3 genders. ब्राह्मणाय अयं. ब्राह्मणार्थः (सूपः) (Dholl) for the Brahmans ब्राह्मणार्था ब्राह्मणार्थम् for the brahman. Elsewhere the compound is Anitya. When words denoting the same substance in its original and changed form respectively are compounded together the latter becomes the 1st member of the compound as यूपदारु wood for the Yupa or peg to which the sacrificial sheep is tied, कुण्डलहिरण्यं gold for an ear ornament.

A dative is also compounded with the words बलि oblation हित good सुख pleasure and रक्षित protection following it, as भूतबलि oblation to the spirits, गोहितं good for the cows &c.

An ablative is compounded with the words भीत afraid, भय, भीति and भी all meaning fear coming after

स्तोकांतिकदूरार्थ कृच्छ्रे चालुक् समस्यते क्तान्ते ॥

यथा ॥ सिम्हाद्भयं सिम्हभयम् । स्तोकान्मुक्तः अल्पान्मुक्तः । इत्यादि ॥

॥ षष्ठीतत्पुरुषो यथा ॥

राज्ञः पुरुषः राजपुरुषः । ब्राह्मणयाजकः ॥

॥ सप्तमीतत्पुरुषो यथा ॥

अक्षेषु शौण्डः अक्षशौण्डः । इत्यव्ययपूर्वाः केवलास्समानाधिकरणाः ॥

असमाधिकरणः केवलोऽव्ययपूर्वकः ।
नित्योनित्यइतिद्वेधा भवेन्नित्यः कुना सह ॥

यथा ॥ कुत्सितः पुरुषः कुपुरुषः ॥

---

it as सिम्हभयं Fear from a lion. &c स्तोक a little अन्तिक near, words meaning distance and कृच्छ्र difficulty in the ablative case are compounded with the following past passive participles and the case termination is not dropped, that is the compound is *Aluk* as कृच्छ्रान्मुक्तः escaped from a difficulty.

Shashthitatpurasha. Ex. राजपुरुषः A servant of the king. ब्राह्मणयाजकः the sacrificing priest of a Brahmin.

Saptamitatpurasha. अक्षशौण्डः clever in dice.

Avyayapurvas are of 2 kinds, Nityas and Anityas with कु words always form Nitya compounds as कुत्सितः पुरुषः कुपुरुषः a bad man. ईषत्पिंगलः slightly reddish brown is Anitya. When the particle न is compounded with a word it is changed to अ before a word beginning with a consonant and to अन्, before a word

अनित्यो यथा ॥ ईषत्पिंगलः ॥ नञ्तत्पुरुषो यथा ॥ न ब्राह्मणः अब्राह्मणः न इन्द्रः अनिन्द्रः न अश्वः अनश्वः । इत्यादि ॥ इति व्यधिकरणेषु केवलाः उक्ताः ॥

असमानाधिकरणो नित्यस्याद्यतिपूर्वकः ।
अनव्ययाव्ययपदपूर्वकः फलितो द्विधा ॥

यथा ॥ अंगीकारंकृत्वा ऊरीकृत्य ॥ अशुक्लः शुक्लसम्पद्यमानः कृतः शुक्लीकृतः शुक्लीकृत्य शुक्लीकृताः ॥ पटत् इति शब्दंकृत्वा पटपटाकृत्य । क्रियां कृत्वा कारिकाकृत्य । आदरं कृत्वा सत्कृत्य । अनादरं कृत्वा असत्कृत्य । अप्रत्यक्षं प्रत्यक्षं कृत्वा साक्षात्कृत्य ॥ इति गतिसमासाः ॥

असमानाधिकरणो नित्यस्यात्यादिपूर्वकः ।
प्रथमान्ताद्युत्तरत्वात्क्रमशः पंचधैव सः ॥

क्रमेण यथा ॥ प्रगतः आचार्यः प्राचार्यः । अतिक्रान्तो मालां

---

beginning with a vowel as न ब्राह्मणः अब्राह्मणः One who is not a brahmin. अनिन्द्रः, अनश्वः &c.

Gatipurvas are of 2 kinds, *Avyayapurvas* and *Anavyayapurvas*. Both are *Nityas*. Ex. अंगीकारं कृत्वा Having acknowledged. ऊरीकृत्यः शुक्लीकृताः That which was not white now made white. श्रेणीकृताः Formed into a guild. पटपटाकृत्य—Having made a noice like पटत् कारिकाकृत्य having done the work. सत्कृत्य—Having respected. असत्कृत्य Having neglected. साक्षात्कृत्य-Having caused to be visible, what was not visible before.

Pradipurvas are always Nityas. These are of 5 kinds according as the 2nd word of the compound is in the Nom. Acc. Ins. Dat. or Abl. case. All are *Nityas*. Ex. प्राचार्यः The great preceptor. अतिमालः

अतिमालः । अवक्रुष्टः कोकिलया अवकोकिलः । परिग्लानोऽध्ययनाय पर्यध्ययनः । निष्क्रान्तः कौशांब्याः निष्कौशांबिः । इति आदिसमासाः ॥

असमानाधिकरणो यस्तूपपदपूर्वकः ।
अनव्ययाव्ययपदपूर्वः सोऽयं द्विधा मतः ॥
अनव्ययोपपदकाः पञ्चकर्मादिपूर्वकाः ।

तत्र कर्मोपपदसमासो यथा ॥ कुम्भं करोतीति कुम्भकारः । श्येनइव चीयते श्येनाचित् । रथचक्रमिव चीयते रथचक्रचित् । कर्त्रुपपदो यथा ॥ पूर्वः सरतीति पूर्वसरः ॥ करणोपपदो यथा ॥ सोमेन इष्टवान् सोमयाजी ॥ अपादानोपपदो यथा ॥ पंकात् जातं पंकजम् ॥ अधिकरणोपपदो यथा ॥ सरसि जातं सरसिजं सरोजं वा ॥

---

one who has crossed the mala river. अवकोकिलः— who is called by the Kokila bird. पर्यध्ययनः One who dislikes study. निष्कौशांबिः One who is come out of kousambi.

Upapadapurvas are of 2 kinds. (*a*) *Anavyayapurvas* and (*b*) *Avyayapurvas*. The former is subdivided into 5 classes according as कर्म, कर्ता, करणं, अपादानं, or अधिकरणम् precedes the verb, Examples. (1) कुम्भं करोतीति- कुम्भकारः A pot maker. श्येनचित्. One who heaps stones in the form of a jalcon (for making a sacrifice.) रथचक्राचित्. One who heaps stones in the form of the wheel of a car. (2) पूर्वसरः One who goes before (3) सोमयाजी One who has performed a sacrifice with the soma juice. (4) पंकजं *lit* growing out of mud; a lotus. (5) सरसिजं or सरोजं growing in a lake; this also means a lotus.

कर्मकर्ता च करणं सम्प्रदानमतः परम् ॥
अपादानाधिकरणे इत्थं स्युः कारकाणि षट् ।
सम्प्रदानातिरिक्तेषु सैष पञ्चसु सम्मतः ॥

अव्ययोपपदो यथा ॥ न जातः अजः । पुरस्सरतीति पुरस्सरः ।
अग्रतस्सरः अग्रेसरः ॥

नित्याउक्ता अनित्योऽपि सम्भवत्येषु कश्चन ॥
यथा ॥ मूलकोपदंशं भुंक्ते । मूलकेनोपदंशं । इत्युपपदसमासाः ।

चत्वारः प्रथमापूर्वाः द्वितीयापूर्वकास्त्रयः ॥
तृतीयापूर्वकाः पञ्च चतुर्थीपूर्वकास्त्रयः ।
द्विविधः पञ्चमीपूर्वः एकः षष्ठ्यन्तपूर्वकः ॥
सप्तमीपूर्वकश्चैको द्विविधोऽव्ययपूर्वकः ।
असमानाधिकरणाः केवला एकविंशतिः ॥
द्विधागतिसमासश्च पञ्च च प्रादिपूर्वकः ।
सप्तोपपदपूर्वास्युः एवमेते चतुर्दश ॥
असमानाधिकरणाः पञ्चत्रिंशदमी स्थिताः ।

कर्म, कर्ता, करणं, संप्रदानं, अपादानं and अधिकरणं are the 6 relations of nouns to verbs in a sentence.

Avyayapurvapadas: Examples: न-जातः अजः-not born पुरस्सरः one who goes in front. अग्रतस्सरः अग्रेसरः one who goes before. The above are *Nityas*. *Anitya* compounds also occur in this class मूलकेन उपदंशं मूलकोपदंशं. (भुक्ते)—(Eats) biting at the root.

Mayuravyamsaka compounds. There are some irregular compounds going by the above name. They are of 2 kinds; *Samanadhikaranas* and *Vyadhikaranas*, each having its *Nitya* as well as *Anitya* varieties.

इत्थं तत्पुरुषास्सर्वे द्विषष्टिरिति बुध्यताम् ॥
समासाये तु वर्तन्ते मयूरव्यंसकादयः ।
ते समानाधिकरणतद्धितेष्वपि च स्मृताः ॥

तत्र अनित्या यथा ॥ व्यंसकश्चासौ मयूरश्च मयूरव्यंसकः ॥ उदक् च अवाक् च उच्चावचम् । निश्चितश्च प्रचितश्च निश्चप्रचम् । नास्ति किञ्चन अस्य अकिञ्चनः । अश्नीत पिबत इति यस्यां क्रियायां अश्नीतापिबता पचतभ्रज्जता खादतमोदता नास्ति कुतो भयं अस्य अकुतोभयः । नित्या यथा ॥ अन्यो राजा राजान्तरम् । चिदेव चिन्मात्रम् ॥

इत्थं द्विगुप्रभृतयः सर्वे तत्पुरुषाअपि ।
मयूरव्यंसकाद्यन्ताः सप्तपञ्चाशदीरिताः ॥

अथ बहुव्रीहयः ॥

केवलश्चाथ संख्येये दिङ्नाम घटितस्ततः ।
तथा कर्मव्यतीहारे तुल्ययोगे च पञ्च ते ॥

केवलबहुव्रीहिः संख्येयबहुव्रीहिः दिङ्नामबहुव्रीहिः कर्मव्यतीहार बहुव्रीहः तुल्ययोगबहुव्रीहिश्चेति पञ्च बहुव्रीहयः ॥

Examples of *anityas* मयूरव्यंसकः A cunning peacock उच्चावचं— of various kinds निश्चप्रचम्

अकिञ्चनः— A pauper· अश्नीतपिबता Invitation to eat and drink. पचतभ्रज्जता Calling to cook and fry. अकुतोभयः One who is afraid of nothing. Examples of Nityas अन्यः राजा· राजान्तरं Another king चिदेव चिन्मात्रं· The vital principle alone.

Bahuvrihi compounds.

This compound is of 5 kinds; (1) Kevala (2) Sankhyeya (3) Dingnama (4) Karmavyatihara &

पञ्चस्वेतेषु यः पूर्वो बहुव्रीहिस्तु केवलः ।
ससमानाधिकरणस्तद्भिन्न इति च द्विधा ॥
आद्योत्तषोढा द्वितीया बहुव्रीह्यादि शब्दितः ॥

क्रमेण यथा ॥ प्रासं उदकं यं सः प्रासोदकः ॥ ग्रामः । व्यूढोरथो येन सः व्यूढरथः । अनड्वान् । उपहृतः पशुः यस्मै सः उपहृतपशुः । रुद्रः । उद्धृतः ओदनः यस्यास्सा उद्धृदौदना स्थाली । पीतं अम्बरं यस्य सः पीताम्बरः । हरिः । वीरः पुरुषः यस्मिन् सः वीरपुरुषकः । ग्रामः ।

स एष एवोपमानवाचि पूर्वपदः क्वचित् ।

यथा ॥ चन्द्रइव मुखं यस्यास्सा चन्द्रमुखी ॥

समस्तपूर्वपदकः क्वचिदेष स च द्विधा ।
समस्तेऽप्युत्तरपदलोपालोपादिभेदतः ॥
षष्ठीसप्तम्यंतप्रादिनञ्पूर्वतास्थित्या ।

---

(5) Tulyayoga. Kevala bahuvrihis are either samanadhikaranas or Vyadhikaranas; & the 1st is subdivided into 6 classes:—Dwitiya bahuvrihi, Thritiya Chaturthi, Panchami, Shashthi and Sapatami. Examples respectively. प्रासोदकः · ग्रामः— A (well) watered village; व्यूढरथः - अनड्वान् A bull that draws the car. उपहृत पशु- रुद्रः Rudra to whom a sheep is offered. उद्धृतौदना - स्थाली A vessel from which the food is taken out. पीतांबरः- हरिः The God vishnu who has a yellow cloth. वीरपुरुषो - ग्रामः A village which has a warrior in it. The 1st word of a Bahuvrihi compound sometimes denotes an object of comparison. चन्द्रमुखी A woman whose face is like the moon.

The 1st member of a Bahuvrihi may itself be a compound. The latter word of such a compound is

उत्तरलोपिसमस्तं भिन्नं तत्पूर्वएष च चतुर्धा ॥
षष्ठ्यन्तपूर्वपूर्वस्तु तेषु द्विविधउच्यते ।
पूर्वस्य चोपमानार्थतदन्यार्थत्वभेदतः ॥

क्रमेण यथा ॥ उष्ट्रस्य मुखं उष्ट्रमुखं । उष्ट्रमुखमिव मुखं यस्य सः उष्ट्रमुखः । केशानां समूहः केशसमूहः । केशसमूहः चूडा यस्य सः केशचूडः । सुवर्णविकारः अलंकारः यस्य सः सुवर्णालंकारः । कण्ठे स्थितः कण्ठस्थितः कण्ढस्थितः कालः यस्य सः कण्ठकालः । अपतितं पर्ण यस्य सः अपर्णः । अविद्यमानः पुत्रो यस्य सः अपुत्रः ।

यस्यादुत्तरलोप्यन्यसमस्तपदपूर्वकः ।
समासपांचविध्येन सोऽपि पंच विधःस्मृतः ॥

क्रमेण यथा ॥ भूतपूर्वं अम्बरं यस्य सः भूतपूर्वाम्बरः । आफ-

---

retained in some cases, and dropped in others. It is dropped in the case of compounds of which the 1st member is a noun in the Genitive or Locative case or the particle न or प्र &c. Examples. उष्ट्रस्य मुखं उष्ट्रमुखं उष्ट्रमुखमिव मुखं यस्य सः उष्ट्रमुखः (Here the 2nd word मुख of the 1st compound उष्ट्रमुख is dropped in forming the bahuvrihi compound with the word मुख) One who has a face like that of the camel. केशचूडः— One who has a tuft of hair. सुवर्णालंकारः One who is decked with gold jewels. कण्ठकालः One who has poison in his neck (siva) अपर्णः A tree whose leaves have follen. अपुत्रः—One who has no son.

Where the 2nd word is not dropped the compound is of 5 kinds according as the 1st compound belongs to one or the other of the 5 classes of Samasas. Examples. भूतपूर्वाम्बरः one who had once a cloth. आफ-लोदयकर्मा one who perseveres till he obtains his end

लोदयं कर्म यस्य सः आफलोदयकर्मा । शिवपदं शरणं यस्य सः शिवपदशरणः । चन्द्रचूडः शरणं यस्य सः चन्द्रचूडशरणः । रामकृष्णौ देवौ यस्य सः रामकृष्णदेवः ।

इत्थं हि ते समानाधिकरणाः षोडशस्मृताः ।
व्यधिकरणबहुव्रीहिर्यथा ॥ चक्रं पाणौ यस्य सः चक्रपाणिः । एवं सच्छात्रजन्मा मनोजन्मा उच्चैर्मुखः अधोमुखः इत्यादिः ॥

एते द्विपदकाज्ञेयाः अनेकपदकोऽप्ययं ।
यथा ॥ पृथु पिंगलं गात्रं यस्य सः पृथुपिंगलगात्रः । इत्यादि । इति केवलबहुव्रीहिः ॥

ससंख्येयबहुव्रीहिः पूर्वभेदेन पञ्चधा ॥
क्रमेण यथा ॥ दशानां समीपे ये सन्ति ते उपदशाः । नव

शिवपदशरणः one whose defence is sivas foot. चन्द्रचूडशरण one whose defence is the God siva. रामकृष्णदेवः one whose Gods are Rama and Krishna. Examples of Vyadhikarana bahuvrihi compounds चक्रपाणिः one who has a discus in his hand (The God Vishnu) सच्छात्रजन्मा·

मनोजन्मा- One who has his origin in the mind (The God of love) उच्चैर्मुखः one whose face is upturned. अधोमुखः one whose face is turned down·

In all the above examples only 2 words are compounded at a time. More than 2 words may also be compounded at the same time. Ex. पृथुपिंगलगात्रः one who has a stout and yellow body.

Sankhyeyabahuvrihis or numeral compounds are of 5 kinds according to the meaning of the 1st word of the compound. Examples:—

एकादशवेत्यर्थः । आसन्नविंशाः अदूरत्रिंशाः अधिकचत्वारिंशाः द्वौ वा त्रयोवा द्वित्राः । द्विरावृत्ताः दश द्विदशाः । दिङ्नामबहुव्रीहिर्यथा । दक्षिणस्याः पूर्वस्याश्च दिशोरन्तरालं दक्षिणपूर्वा । दक्षिणपश्चिमा इत्यादि ॥

अथ कर्मव्यतीहारबहुव्रीहिर्यथा ॥ केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि । दण्डैश्च दण्डैश्च प्रहृत्य इदं युद्धं प्रवृत्तं दण्डादण्डि । मुष्टीमुष्टि बाहूबाहवि इत्यादि ।

अथ तुल्ययोगबहुव्रीहिर्यथा । पुत्रेण सह सपुत्रः सहपुत्रः । सकर्मकः सलोमकः इति बहुव्रीहयः ॥

अथ द्वन्द्वः ॥

इतरेतरयोगे च समाहारे च स द्विधा ।
द्विपदोऽनेकपदको द्वन्द्वस्स च पुनर्द्विधा ॥

उपदशाः Figures near ten. आसन्नविंशाः Figures near twenty. अदूरत्रिंशाः Not far from thirty: अधिकचत्वारिंशाः over forty· द्वित्राः Two or three. द्विदशाः Twice ten.

Dingnamabahuvrihis

दक्षिणपूर्वा South East. उत्तरपूर्वा North East.

Karmavyatihara bahuvrihis. केशाकेशि A fight in which the antagonists hold each other by the hair दण्डादण्डि. A fight in which the antagonists beat each other with clubs.

मुष्टीमुष्टि. A boxing duel. हस्ताहस्ति- A duel fought with the hands. Indeclinable.

Tulyayogabahuvrihis.—सपुत्रः- Along with (ones) son. सकर्मकः (A verb which is used) along with an object. सलोमकः- (An animal) with a tail.

यथा ॥ रामश्च लक्ष्मणश्च रामलक्ष्मणौ । रामश्च लक्ष्मणश्च तयोस्समाहारः रामलक्ष्मणम् । रामलक्ष्मणभरतशत्रुघ्नाः रामलक्ष्मणभरतशत्रुघ्नम् ।

बालबोधाय रचिते वृत्तिविग्रहसङ्ग्रहे ।
समासवृत्तिः प्रथमा समग्रा समभूदियम् ॥

श्रीगुरुभ्यो नमः श्रीगणेशाय नमः ॥

अथ एकशेषवृत्तिः ॥

सरूपश्च विरूपश्चेत्येकशेषोद्विधा भवेत् ।

तत्र सरूपो यथा ॥ रामश्च रामश्च रामौ । रामश्च रामश्च रामश्च रामाः ।

Dwandwa compounds are of 2 kinds Itaretarayoga and Samahara, each being subdivided into Dwipada and Bahupada.

Examples. रामलक्ष्मणौ- Rama and Lakshmana. रामलक्ष्मणभरतशत्रुघ्नाः- Rama, Lakshmana Bharata and Satrughua रामलक्ष्मणं. The company made up of Rama and Lakshmana. रामलक्ष्मणभरतशत्रुघ्नं- The company made up of Rama &c. End of the Samasavrithi.

Ekasesha Vrithi.

Ekasesha is a complex formation in which, as the name indicates, only one of the members is retained and the others are dropped.

Ekaseshas are of 2 kinds–Sarupas and Virupas; and the latter has 2 subdivisions according as the component words have the same or different meanings. रामौ, लक्ष्मणाः &c are examples of Sarupaikasesha;

विरूपोऽपि समानार्थोऽसमानार्थइति द्विधा ।
समानार्थो यथा ॥ वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ कुटिलदण्डौ वा ।

विरूपास्त्वसमानार्था नवधापरिकीर्तिताः ।
गोत्रान्तोऽत्र युवान्तेन सहोक्तौ शिष्यते क्वचित् ॥
यथा ॥ गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ गार्गी च गार्ग्यायणौ च गर्गाः ॥

स्त्रिया सह पुमान् लिंगवैरूप्येशिष्यते क्वचित्॥
यथा ॥ हंसी च हंसश्च हंसौ ।

स्वसृशब्द भ्रातृशब्दयोगे भ्रातैव शिष्यते ॥
यथा ॥ भ्राता च स्वसा च भ्रातरौ ।

पुत्रशब्दस्तु दुहितृशब्देन सह शिष्यते ॥
यथा ॥पुत्रश्च दुहिता च पुत्रौ ॥

वक्रदण्डौ, कुटिलदण्डौ. two men with crooked sticks are examples of Virupaikaseshas in which the component members have the same meaning.

Virupaikaseshas, in which the component words are different but their meanings may or may not be the same, are of 9 kinds:—

(1) When a Gotranta and Yuvanta are compounded the latter is sometimes dropped. *Gotranta* is a word denoting a lineal descendant whose father is alive; as गार्ग्यौ. 2 descendants of Garga

(2) When a word in the masculine gender is compounded with its feminine the latter is sometimes dropped. हंसौ A male and female swan.

(3 & 4) When स्वसृ and दुहितृ are compounded with भ्रातृ and पुत्र respectively, the former are dropped. भ्रातरौ A sister and a brother पुत्रौ- A son and a daughter.

नपुंसकं तदितरैः सहैकवचनं तु वा ॥

शुक्लः पटः शुक्ला शाटी शुक्लं वस्त्रं तदिदं शुक्लं तानीमानि शुक्लानि ।

पितृशब्दो मातृशब्दसहोक्तः शिष्यते न वा ॥

यथा ॥ माता च पिता च पितरौ । मातापितरौ मातरपितरौ ॥

श्वश्रूशब्देन सह तु श्वशुरः शिष्यते न वा ॥

यथा ॥ श्वश्रूश्च श्वशुरश्च श्वशुरौ श्वश्रूश्वशुरौ ।

शिष्यते यत्परं तत्तुपूर्ववाथत्यदादिषु ।
त्यत्तद्यदेतदिदमोद्वदए तद्धियुष्मदः ।
अस्मद्भवत्किमश्चेति द्वादशामीत्यदादयः ॥

यथा ॥ स यश्च यौ । स च यश्च तौ । त्वं च अहं च आवां ॥

---

(5) When an adj. in the neuter gender is compounded with its masculine or femenine form or both, the former alone is retained, and the compound is sometimes singular in number.

(6 & 7) When पितृ and श्वशुर are compounded respectively with मातृ and श्वश्रू the latter are sometimes dropped. Ex. पितरौ श्वशुरौ Parents.—Father- in-law and mother in-law. Dwanda compounds also occur in these. Eg माता- पितरौ or मातरपितरौ श्वश्रू श्वशुरौ

(8) The following 12 words are called Tyadadis त्यदादिः—त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि , युष्मद् , अस्मद् , भवत् , किम् .

When two or more of these words are compounded, that which is last in the list is generally retained. सच यश्च यौ or तौ. He and this person त्वं च अहं च आवां

गवादयस्त्वतरुणग्राम्यपश्वोघबोधकाः ।
भिन्नलिंगायादियुताः स्त्रीलिंगः शिष्यते तदा ॥
यथा ॥ गौश्च गौश्च पुल्लिंगः गौश्च स्त्रीलिंगः गावः इमाः ।
इत्येवमेकशेषाःस्युरेकादशविधागताः ।
सुखबोधाय रचिते वृत्तिविग्रहसंग्रहे ॥
द्वितीयैषाह्येकशेषवृत्तिस्संपूर्णतामगात् ।
श्रीगुरुभ्योनमः । श्रीगणेशाय नमः ।

अथतद्धितवृत्तयः ॥

वाचका द्योतकाश्चेति तद्धिताद्विविधाः स्मृताः ।
अण्यादयो वाचकाःस्युर्द्योतकास्त्वसिलादयः ॥
अपत्याद्यर्थभेदेन वाचकाबहवोऽप्यमी ।
प्रथमादिविभक्त्यन्तप्रकृतित्वात्तु सप्तधा ॥

---

(9) When the nouns denoting the country-beasts are compounded, only those that are in the feminine gender remain; example:—गौश्च+गौश्च (masculine) +गौश्च (feminine) becomes गावः इमाः (feminine) This ends the (एकशेषवृत्तिः) Eleven on the whole comprised in (सरूपैकशेष and विरूपैकशेष)

Thathithavirthi

Thathitha terminations are of two kinds, those that convey signifigance in themselves (वाचक) and those that simply indicate certain meaning (द्योतक) अण् or अ, ठक् or इक &c. are of the former class, तसिल् or तस्, त्रल्, or त्र are of the latter class.

Although Thathitha terminations are of several sorts owing to their several meanings, yet they are

प्रथमान्तप्रकृतिकान् प्रथमंब्रूमहेतरां ।
अणप्रत्ययाधिकारस्थान् ब्रूमस्तत्रापि तद्धितान् ॥
इहाधिकारे सर्वत्र सर्वाभ्योण् प्रत्ययो भवेत् ।
विशिष्यविहिताज्ञेया अधस्ताल्लिखनेन ते ॥

कचित् प्रकृतिनियमो विशेष्यानियमः कचित् ।
द्वावप्येतौ कचिदिति सर्वत्रेहावधार्यताम् ॥

पौषीपौर्णमासी अस्मिन् पौषः । मासः । आग्रहायणी ।

---

divided into seven classes as they are based upon seven cases.

We explain those at first that are based upon (Prathama) the first case, wherein we begin with अण् generally. The exceptions will be shown in the list.

Termination अण्(अ)

Nominative case.

General Rule:—Thathitha terminations sometimes apply to certain nouns, sometimes qualify certain nouns & sometimes apply to both.

Note: The first vowel of the case प् क् & न् takes its vridhi substitute when Tadhita terminations are added.

Eg:–पौषः meaning the month in which पौषी appears.
Exeception—The term ठक् (इक) फाल्गुनिक—फाल्गुन .

(2) It is used to denote the presiding deity
Eg:—इन्द्रो देवता अस्यः—ऐन्द्रं.
Exception—शतरुद्राः देवताः अस्य – शतरुद्रीयं [च्छ] ईय.

आग्रहायाणिकः । अश्वत्थः पौर्णमासी अस्मिन् आश्वत्थिकः ।
ठक्
ठक्
फाल्गुनी । फाल्गुनिकः । फाल्गुनः । एवं श्रवणा । कार्त्ति-
ठक्
की । चैत्री । श्रावणिकः । श्रावणः । इत्यादि ॥ पौर्णमासी
ठक्
विशेषवाचिभ्यः प्रकृतिनियमः । विशेष्यस्य संज्ञात्वनियमश्च ॥
इन्द्रोदेवता अस्य ऐन्द्रम् । हविः । को देवता अस्य कायम् ।
हविः । शुक्रियम् । अपोनप्त्रियं अपान्नप्त्रियम् । अपोनप्त्रीयं ।
घन् घः घः छः
अपान्नप्त्रीयम् । शतरुद्रियं शतरुद्रीयम् । महेन्द्रियं माहेन्द्रम् ।
छः घः छः घः अण्
महेन्द्रीयम् । सौम्यम् । सौमी । वायव्यम् । ऋतव्यम् । पित्र्यम् ।
छः ष्यण् यत् यत् यत्
उषस्यम् । द्यावापृथिवीयं द्यावापृथिव्यम् । एवं शुनासीर ।
यत् छः यत्
वास्तोष्पति । गृह्यमेधानां रूपद्वयम् । आग्नेयम् । मासिकम् ।
ढक् ठक्
प्रावृषेण्यम् । माहाराजिकम् । प्रौष्ठपदिकम् । नवयज्ञोऽस्मिन्
एण्यः ठञ् ढञ्
वर्त्तते । नावयज्ञिकः । पाकयज्ञिकः । कालः । पूर्णमासोऽस्यां
ठक् ठक्
वर्त्तते पौर्णमासी । तिथिः । नवयज्ञादिशब्देभ्य इति नियमः ।
पंक्तिरादिरस्य पांक्तः । प्रगाथः ।
छन्दोवाचिभ्य एवायं प्रगाथश्चेद्विशेष्यकः ॥

---

(3) It is used to denote time:—

Eg. नवयज्ञः अस्मिन् वर्त्तते—नावयज्ञिकः

पूर्णमासोऽस्यां वर्तते—पौर्णमासी [तिथिः]

This will invariably be used in this sense.

(4) पंक्तिः आदिः अस्य—पांक्तः- प्रगाथः—means the part of

सुभद्रा प्रयोजनं अस्य सौभद्रः । संग्रामः । भारताः योद्धारः अस्य भारतः । संग्रामः । विशेष्यानियमस्संग्राम इति । दण्डः प्रहरणं अस्यां । दाण्डा । क्रीडा । श्येनपातोऽस्यां श्यैनंपाता । मृगया । तैलंपाता । स्वधा । उदुम्बराः संत्यस्मिन् औदुंबरः । देशः । विशेष्यनियमोदेशइति । स्रुघ्नोनिवासः अभिजनो वा स्रौघ्नः ।

यत्र स्वयं वसति स निवास इति कथ्यते ।
पूर्वैर्यत्रोषितं स्वीयैर्विज्ञेयोभिजनस्तु सः ॥

स्रुघ्नो भक्तिरस्य स्रौघ्नः । भक्तिः सेव्यः । वासुदेवकः । अर्जुनकः ।
तुन् वुन्

प्रथमांतप्रकृतिका गता अणधिकारगाः ॥
द्वितीयांतप्रकृतिकाः कथ्यंते ते तु सांप्रतम् ॥

व्याकरणं अधीते वेद वा वैयाकरणः । आग्निष्टोमिकः । वाज-
ठक्

---

which पंक्ति (छन्दः) is the beginning.

(5) सुभद्रा प्रयोजनं अस्य–सौभद्रः संग्रामः. The particle will always govern the particular word.

[6] दण्डः प्रहरणं अस्यां दाण्डा क्रीडा (sport with clubs)

(7) उदुम्बराः सन्त्यस्मिन् औदुम्बरः देशः. (name of a country) This invariably governs the name of country.

(8) स्रुघ्नः निवासः अभिजनोवा स्रौघ्नः निवासः–the place in which one lives. अभिजनः That in which his ancestors lived.

(9) स्रुघ्नो भक्तिरस्य स्रौघ्नः =one who is strongly attached to the Srughna country.

वासुदेवो भक्तिरस्य वासुदेवकः=one who is a votary of God
वुन् अक

Vasudeva.

Accusative base.

(1) व्याकरणं अधीते वेद वा वैयाकरणः one who is learning or learned in (व्याकरण) Grammar.

पेयिकः नैयायिकः । वृत्तिं । वार्त्तिकः । लौकायतिकः । सांग्र-
ठक् ठक् ठक्
हसूत्रिकः । कालपसूत्रः । वायसविद्यिकः । गौलक्षणिकः । पा-
ठक् ठक् ठक्
राशरकल्पिकः । आंगविद्यः । क्षात्रविद्यः । धार्मविद्यः ।
ठक्
त्रिविधा विद्या त्रिविद्या । तां अधीते वेद वा त्रैविद्यः । याव-
क्रीतं नाम आख्यानम् । यावक्रीतिकः । वासवदात्तिकः । ऐति-
ठक् ठक्
हासिकः । पौराणिकः । सर्ववेदान् अधीते सर्ववेदः । सर्वतन्त्रः ।
ठक् ठक्
सवार्त्तिकः । द्वितंत्रः । पूर्वपदिकः । उत्तरपदिकः । शतपथिकः ।
इकन् इकन् षिकन्
षाष्टिपाथिकः । क्रमकः । पदकः । मीमांसकः । शिक्षकः ।
षिकन् वुन् वुन् वुन् वुन्

न्यायं अधीते वेद वा नैयायिकः one who is learning or learn-
ठक् ed in; (न्याय) Logic.

त्रिविधा विद्या त्रिविद्या तां अधीते वेद वा त्रैविद्यः one who is learning or learned in three Sciences.

यावक्रीतं नाम आख्यानं अधीते यावक्रीतिकः one who has studied.
ठक्
or is studying यावक्रीत (name of a book)

वासवदत्तां (नाम आख्यायिकां) अधीते वासवदात्तिकः one who has studied or is studying the book वासवदत्ता.

ऐतिहासिकः one who has studied Ithihasa.
ठक्

पौराणिकः one who has studied Purana.
ठक्

क्रमकः one who has studied Krama अक.
वुन्

पदकः one who has studied Pada अक.
वुन्

वासंतिकः । आथर्वणिकः ।
ठक् ठक्
पाणिनिना प्रोक्तं पाणिनीयम् । तदधीते वेद वा । पाणिनीयः ।
पाणिनीया । अष्टौ अध्यायाः प्रमाणं अस्य अष्टकम् । पाणिनेः
सूत्रम् । तदधीते अष्टकः । कठेन प्रोक्तं अधीते । कठः ॥
स्रुघ्नं गच्छति । स्रौघ्नः । पंथाः दूतोवा ॥ स्रुघ्नं अभिगच्छति ।
स्रौघ्नं । कान्यकुब्जद्वारं । विशेष्यनियमः द्वारमिति ॥ सुभद्रा-
मधिकृत्य कृतोग्रंथः । सौभद्रः । शिशुक्रंदीयः । किरातार्जुनी-
छः छः
यः । विक्रमोर्वशीयः । इत्यादि ॥
छः

तृतीयांतप्रकृतिका यथा ॥

कषायेण रक्तं वस्त्रं काषायम् । मांजिष्ठम् । लाक्षया रक्तं लाक्षिकम् ।
ठक्

पाणिनिना प्रोक्तं पाणिनीयं तदधीते वेद वा पाणिनीयः one who has studied the grammar first revealed by Panini.

कठेन प्रोक्तं अधीते कठः one who has studied the treatise made by कठ.

(2) स्रुघ्नं गच्छति स्रौघ्नः पन्थाः दूतो वा Either (1) the road leading to Srughna country or (2) the messenger proceeding thereto.

स्रुघ्नं अभिगच्छति स्रौघ्नं (कान्यकुब्जद्वारं) The gate of facing the Sru- Kanyakubja ghna country.

(3) सुभद्रां अधिकृत्य कृतो ग्रन्थः सौभद्रः The story or treatise relating to Subhadra.

किरातार्जुनावधिकृत्य कृतो ग्रन्थः किरातार्जुनीयः a treatise relating to Kirata and Arjuna. ईय. Dwandva compound.

एवं विक्रमोर्वशीयः a treatise treating of Vikrama and
छः
Urvasi.

रौक्मिकम् । शाकालिकम् । कार्दमिकम् । शाकलः कार्दमः । नी-
ठक् ठक् ठक्
ल्या रक्तं नीलं पीतकम् । हारिद्रम् । माहाराजनम् ॥
अन् कन् अञ् अञ्
इह रञ्जनसाधनवाचकादिति प्रकृतिनियमः ॥
पुष्येण युक्तं पौषम् । अहः । पौषी । रात्रिः । द्वन्द्वात् ।
तिष्यपुनर्वसवीयम् । अहः । राधानूराधीया । रात्रिः । अत्र
छः छः
नक्षत्रवाचिप्रकृतिनियमः । काल इति विशेष्यनियमश्च ।

Instrumental base

(1) कषायेण रक्तं वस्त्रं काषायम् a cloth dyed in red (Kashaya)

लाक्षया रक्तं लाक्षिकम् a cloth or thing dyed in Laksha juice. This particle invariably accompanies the words denoting colour.
ठक्

(2) पुष्येण युक्तं पौषं अहः The day on which Pushya constellation appears.

पौषी रात्रिः. The night on which Pushya constellation appears.

तिष्यपुनर्वसवीयम्. The day on which the two constellations Thishya and Punarvasu appear.

राधानूराधीया The night on which Radha and Anuradha appear. The particle ईय appears in these and similar Dwandva compounds.
छः

Note:—This termination will always govern words denoting time.

(3) वसिष्ठेन दृष्टं साम वासिष्ठम् The part of the Veda called Sama, founded by Vasishta.

वासिष्ठेन दृष्टं साम वासिष्टम् । औशनसम् । औशनम् । वामदेव्यम्
ष्यञ्
साम्नोविशेष्यत्वम् ॥

वस्त्रैः परिवृतः वास्त्रः । रथः । अत्र रथ इति विशेष्यनियमः ॥

कुशांबेन निर्वृत्ता कौशांबी । चक्षुषा गृह्यते चाक्षुषम् । श्रा-
वणः । औपनिषदः ॥ अश्वैः उह्यते आश्वः ॥ पाणिनिना प्रोक्तं
पाणिनीयम् ॥ सुदाम्ना एकदिक् सौदामनी ॥ पाणिनिना उपज्ञातं
छः
पाणिनीयम् ॥ वररुचिना कृतोग्रंथः वाररुचः ॥ संज्ञायां माक्षि-
छः

वामदेव्यं ष्यञ् The part of the Veda, called Sama, founded by Vamadeva.

Note:—This termination always governs SamaVeda.

(4) वस्त्रैः परिवृतः वास्त्रः रथः a car surrounded by cloth (hangings)

Note:—This always governs words denoting car.

(5) कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी a town named Kousambi founded by the king Kusamba.

(6) चक्षुषा गृह्यते चाक्षुषम् a thing to be perceived by the eyes.

(7) अश्वैरुह्यते आश्वः a vehicle drawn by horse.

(8) पाणिनिना प्रोक्तं पाणिनीयम् that which was first
छः
revealed by Panini.

(9) सुदाम्ना एकदिक् सौदामनी that which is produced in the direction of the mountain named Sudama. Lightning.

(10) पाणिनिना उपज्ञातं पाणिनीयम् That which was first
छः
perceived by the supreme wisdom of Panini.

(11) वररुचिना कृतो ग्रन्थः वाररुचः a treatise made

काभिः कृतं माक्षिकम् । मधु ॥

चतुर्थ्यन्तप्रकृतिकाः न सन्त्यणधिकारगाः ॥

अस्यन्तप्रकृतिकान् कथयामोऽधुना ततः ॥

सुघ्नादागतः स्रौघ्नः । शुल्कशालाया आगतः शौल्कशालिकः ।
ठक्

औपाध्यायकः । पैतामहकः हौतृकं । मातृकं । भ्रातृकं । पित्र्यं ।
वुञ् वुञ् ठञ् ठञ् ठञ् यत्

पैतृकम् । समादागतं समरूप्यम् । समीयम् । विषमरूप्यम् । विष-
ठञ् रूप्य छ रूप्य

मीयम् । देवदत्तरूप्यम् । दैवदत्तम् । सममयम् । विषममयम् । दे-
छ रूप्य मयट् मयट्

वदत्तमयम् । हिमवतः प्रभवति हैमवती । गङ्गा । विदूरात् प्रभवति
मयट्

वैदूर्यः । मणिः ।
ञ्यः

---

by Vararuchi.

(12) काभिः कृतं माक्षिकं मधु. That which was formed by bees, viz, honey.

Dative base——————Nil

Ablative base

(1) सुघ्नादागतः स्रौघ्नः one come from the Srughna country.

शुल्कशालायाः आगतः शौल्कशालिकः one come from the toll -gate.
ठक्

(2) हिमवतः प्रभवति हैमवती गंगा That which issued from Himavat or Himalaya. viz, Ganga, Ganges.

विदूरात् प्रभवति वैदूर्यः मणिः that which came out of the vidoora mountain viz Ruby.

(1) अथ षष्ठीप्रकृतिकाः कथ्यन्ते ते तु सम्मति ॥

यथा । उपगोरपत्यं औपगवः ॥

अपत्यं केवलं गोत्रं युवसंज्ञमिति त्रिधा ॥

गर्गस्य गोत्रापत्यं गार्ग्यः । गर्गस्य युवापत्यं गार्ग्यायणः ।

यञ् फक्

अदन्तानां च बाह्वादेरिञ्प्रत्यय इह स्मृतः ॥

दाक्षिः । बाहविः । सौमित्रिः । सुधातुः सौधाताकिः । गंगाया

इञ् इञ् इञ् इञ्

गांगः । गांगायनिः । गांगेयः । पौत्रः । दौहित्रः । शिवादे

फिञ् ढक् अञ् अञ्

शैवः । यामुनः । नार्मदः । वासिष्ठः । वैश्वामित्रः । वासुदे-

वः । नाकुलः । साहदेवः । द्वयोः मात्रोः अपत्यं द्वैमातुरः ।

Genitive Base.

(1) उपगोः अपत्यं पुमान् औपगवः (1)son of उपगु General अण् अपत्यं is of 3 kinds viz:—केवलापत्यं, गोत्रापत्यं & युवापत्यं. केवलापत्यं the direct son· गोत्रापत्यं a son begot in the family and includes all commencing from the son's son. युवापत्यं a son in the fourth degree, the progenitor still living. The particle in युवापत्यं should be added on to the base in गोत्रापत्यं.

Eg to केवलापत्यं is औपगव.

Eg to गोत्रापत्यं is गर्गस्य गोत्रापत्यं गार्ग्यः Exception य including all commencing from Garga's grandson.

Eg to युवापत्यं गर्गस्य युवापत्यं गार्ग्यायणः the great-grandson of गर्ग the latter being alive.

Exception इञ् दक्षस्य अपत्यं पुमान् दाक्षिः; सुमित्रा सौमित्रिः गंगा

गांगः गांगायनिः गांगेयः

फिञ् ढक्

द्वयोः मात्रोः अपत्यं द्वैमातुरः one begot by two mothers जरा-

षाण्मातुरः । भाद्रमातुरः । कन्यायाः अपत्यं कानीनः । स्त्री-
प्रत्ययांतानां वैनतेयः । रौहिणेयः । कल्याण्याः काल्याणिनेयः ।
ढक् ढक् ढक्
बंधक्याः बांधकिनेयः । कुलटायाः कौलटिनेयः । कौलटेयः ।
ढक् ढक् ढक्
कौलटेरः । चाटकैरः । अपत्यं स्त्री तु चटका । गौधेरः । गौ-
ढ्रक् ऐरक् ढ्रक्
धेयः । गौधारः : जाडारः । पांडारः ।
ढक् आरक् आरक् आरक्

अंगहीनाः शीलहीनाः क्षुद्रास्ताभ्यस्तु ढक् ढ्रकौ ॥

यथा । काणेयः । काणेरः । दासेयः । दासेरः । पैतृष्वस्रीयः
छण्
पैतृष्वसेयः । मातृष्वस्रीयः । मातृष्वसेयः । श्वशुर्यः । स्वस्रीयः ।
ढक् छण् ढक् यत् छ
भ्रातृव्यः । भ्रात्रीयः । रैवातिकः । कुर्वादेः कौरव्यः । सेनांतस्य
व्यन् छः ठक् ण्यः
हारिषेण्यः । लाक्षण्यः । शिल्पिनां तांतुवाय्यः । कौम्भकार्यः ।
ण्यः ण्यः ण्यः ण्यः
नापित्यः । हारिषेणिः । लाक्षणिः । तान्तुवायिः । कौंभकारिः ।
ण्यः इञ् इञ् इञ् इञ्

सन्धः षण्णां मातॄणां अपत्यं षाण्मातुरः one begot by 6 mothers name of god Subrahmania. कन्या कानीनः=व्यास son of मत्स्यगन्धी, or कर्ण son of कुन्ती. कन्या is turned into कनी-न. विनता वैनतेयः Femenine gender where ढक् comes in. अंगहीनः शीलहीनः Here the exceptions ढक् ढ्रक् come in. Eg काण काणेयः काणेरः=son of a blind man दास दासेयः दासेरः =son of a menial servant. पितृष्वस्र father's sister. मातृ-ष्वस्र mother's sister पैतृष्वस्रीयः पैतृष्वसेयः मातृष्वस्रीयः मातृष्वसेयः Exception छ ईय ढ एय. शिल्पी manufacturer तन्तुवाय तान्तु-वाय्यः son of a cloth weaver. कुम्भकारः कौम्भकार्यः son of a pot-

नापितायनिः । ताक्ष्णः । ताक्षण्यः ।
फिञ् अण् ण्यः

देशक्षत्रोभयार्थेभ्यस्तद्राजाः स्युरञादयः ।
अपत्ये राज्ञि च स्युस्ते लुप्ता बहुषु चास्त्रियाम् ॥

यथा । इक्ष्वाकूणां अपत्यं राजा वा ऐक्ष्वाकः ऐक्ष्वाकौ इक्ष्वा-
अञ्
कवः । एवं पाञ्चालः । पौरवः । पाण्ड्यः । आङ्गः । वांगः ।
अञ् अण् ष्यण् अण् अण्
कौसल्यः । कौरव्यः । नैषध्यः । बहुत्वे पञ्चालाः । इत्यादि ।
ञ्यञ् ण्यः ण्यः

कंबोजादिषु सर्वत्र लुप्तास्तद्राजसंज्ञकाः ॥

यथा । कंबोजानां अपत्यं राजा वा कंबोजः । चोलः । शकः ।
केरलः । यवनः । क्वचिल्लोपो न । पाञ्चाली । वैदर्भी । इत्या-
दि । पितुर्भ्राता पितृव्यः । मातुर्भ्राता मातुलः । मातुः पिता
व्यः डुलच्

-ter नापित नापित्यः- son of a barber. Exception ण्य य or (तंतुवायिः कौम्भकारिः इञ् इ) नापितायनिः फिञ् आयनिः. When the base denotes king and country it loses its Thadhithavrithi in its plural significance except in the case of feminine gender. It goes by the name of तद्राज Eg इक्ष्वाकूणां अपत्यं राजा वा ऐक्ष्वाकः ऐक्ष्वाकौ इक्ष्वाकवः पाञ्चालः पाञ्चालौ पञ्चालाः The Thathithavrithi disappears in the case of कम्बोज &c कम्बोजानां अपत्यं राजा वा कम्बोजः कम्बोजौ कम्बोजाः It does not become काम्बोज. Similarly are चोल शक केरल and यवन.

(2) पितुः भ्राता पितृव्यः father's brother. Exception व्य. मातुः भ्राता मातुलः. mother's brother. Exception डुलच्, -उल मातुः पिता मातामहः mother's father. Exception डाम. ट्टच् आमह, पितुः पिता पितामहः father's father.

मातामहः । पितुः पिता पितामहः । अवेः धुग्धं अविसोढम् ।
डामहच् डामहच् सोढ
अविदूसम् । अविमरीसम् । काकानां समूहः काकम् । बाकम् ।
दूस मरीसच्
भिक्षाणां भैक्षम् । गर्भिणीनां गार्भिणम् । युवतीनां यौवनम् ।
यौवतम् । औपगवकम् । औक्षकम् । औष्ट्रकम् । औरभ्रकम् ।
अञ् वुञ् वुञ् वुञ् वुञ्
राजकम् । राजन्यकम् । राजपुत्रकम् । वात्सकम् । मानुष्यकम् ।
वुञ् बुञ् वुञ् वुञ् वुञ्
आजकम् । वार्धकम् । कैदार्यम् । कैदारकम् । कैदारिकम् ।
वुञ् वुञ् यत् वुञ् ठक्
गाणिक्यम् । ब्राह्मण्यम् । बाडब्यम् । माणव्यम् । ग्रामता ।
यञ् यत् यत् यत् तल्
जनता । बन्धुता : गजानां गजता । सहायता । पर्शूनां स-
तल् तल् तल् तल्
मूहः पार्श्वम् । कापोतम् । मायूरम् । सात्तुकम् । हास्तिकम् ।
णस् अञ् अञ् ठक् ठक्
धैनुकम् ॥ कैश्यम् ॥ कैशिकम् ॥ अश्वीयम् ॥ आश्वम् ॥
ठक् यञ् ठक् छ अण्

---

(3) अवेः दुग्धं अविसोढं अविदूसं आविमरीसं milk of sheep Exception सोढ दूस मरीस.

(4) काकानां समूहः काकं crowd of crows बक बाकं बक (collection of duck) वुञ् अक उष्ट्रऔष्ट्रकं herd of camels राजन् राजकं Assumbly of kings Exception or राजन्य राजन्यकम् crowd of Kshatri-yas. वत्स वात्सकं collection of children or calves. वृद्ध वार्द्धकं collection of old people. केदार कैदार्यं कैदारकं कैदारिकं. य अक इक collection of fields. गणिका गाणिक्यं, (य) collection of Dasi s. ग्राम जन बन्धु ग्रामता जनता and बन्धुता (तल्) feminine. कपोत मयूर कापोतं मायूरं अञ् अ. हस्ति धेनु हास्तिकं धैनुकं (ठक् इक) clus-

पाश्या ॥ तृण्या ॥ घूम्या ॥ वन्या ॥ वात्या ॥ खलानां खल्य
य य य य य य
खलिनी ॥ गव्या ॥ गोत्रा ॥ रथ्या ॥ रथकड्या ॥
इनि य त्र य कड्यच्
शिबीनां विषयः शैबः । देशः । विषयः अत्यन्तपरिशीलित इत्यर्थः
राजन्यानां विषयो देशः राजन्यकः ॥ शिबीनां निवासः शैबः ।
वुञ्
विदिशायाः अदूरभवं वैदिशम् ॥

इतः प्रभृति केचित्तु प्रत्ययाश्चातुरर्थिकाः ॥
तदस्त्यस्मिन् देश इति तेन निर्वृत्तमित्यपि ॥
तथा तस्य निवासश्च तस्यादूरभवोऽपि च ॥
इत्यर्थेषु चतुर्षु स्युर्वक्ष्यमाणास्तु तद्धिताः ॥
चतुरर्थ्यां समानानि रूपाणीत्यवधार्यताम् ॥

---

ter of hairs. केश कैश्यं कैशिकम् (य ठ इक) अश्व अश्वीयं आश्व collection of horses. पाश तृण घूम वन वात पाश्या. तृण्या घूम्या वन्य वात्या (feminine) य. गो गव्या or गोत्रा collection of cows (Feminine) य त्र. रथ रथ्या or रथकड्या collection of cars. य कड्य.

(4) शिबीनां विषयः शैबः country in which the Sibi families reside.

तेषां निवासः शैबः town in which the Sibi families reside.

(5) विदिशायाः अदूरभवं वैदिशम् that which is not far from the town Vidisa.

The following termination in (6) is used in four different senses.

(6) कुमुदानां निवासः इत्यादि कुमुदिकम् the place where
ठच्
Kumuda flowers are produced. &c.

कुमुदानां निवास इत्यादिषु कुमुदिकम् । तृणसम् ॥ प्रेक्षी ॥
ठच् स इनि
अश्मरम् ॥ साखेयम् ॥ बल्यम् ॥ पान्थायनः ॥ वाराहकः ॥
र ढञ् य फक् कक्
कौमुदिकः ॥ शर्कराणां निवास इत्यादि । शर्करा ॥ शार्करम् ॥
ठक् लुप् अण्
शार्करिकम् ॥ शार्करीयम् ॥ शार्करकम् ॥ इक्षुमती ॥ नदी ॥
ठक् छ कक् मतुप्
कुमुद्वान् ॥ नड्वान् ॥ वेतस्वान् ॥ नड्वलः ॥ शाद्वलः ॥
डतुप् डतुप् डतुप् वलच् वलच्
इति चातुरार्थिकाः ॥ उपगोरिदं औपगवम् ॥ संवोढुरिदं
सांवहित्रम् । रथ्यम् ॥
यत्

वाहनार्थकपूर्वाणां शब्दानामञ् विधीयते ॥

यथा ॥ अश्वरथस्य इदं आश्वरथम् ॥ इत्यादि ॥ हालिकम् ॥
ठक्

तृणसम् (स) The place where (तृण) grass is produced.

शर्कराणां निवासः शर्करा शार्करं शार्करिकं शार्करीयं शार्करकम् These
लुप् अण् ठक् छ कक्
five forms signify the place where शर्करा stones are found.

इक्षुमती नदी River flowing through lands where sugar-
मतुप्
canes are found in abundance.

कुमुद्वान् possessed of Kumuda flowers नड्वान् overgrown
डतुप् व
with Nada plants.

वेतस्वान् overgrown with vethasa trees. शाद्वलः over-
डतुप् डलच्
grown with tender grass.

सौरिकम् ॥ अग्नीधः शरणं आग्नीध्रम् ॥ समिधां आधानः सामिधेन्यः
ठक् रण् षेण्यण्
मन्त्रः ॥ सामिधेनी ॥ ऋक् ॥ तव इदं तावकम् ॥ तावकीनम् ॥
खञ्
मम इदं मामकम् ॥ मामकीनम् ॥ युवयोः युष्माकं वा इदं यौष्माकम्
खञ्
यौष्माकीणम् ॥ आवयोः अस्माकं वा इदं आस्माकम् ॥ आस्माकीनम्
खञ् खञ्
अश्मनो विकारः आश्मनः ॥ आश्मः ॥ भास्मनः ॥ मार्त्तिकः ॥

स्युः प्राण्योषधिवृक्षेभ्यो विकारेऽवयवेपि च ॥

यथा ॥ मयूरस्य विकारः अवयवो वा मायूरः ॥ मौर्वम् ॥ पैप्पलः ।

विकारेऽवयवे वा स्यात्सर्वप्रकृतिकोमयट् ।
मयडर्थो यदि भवेत् भक्ष्यमाच्छादनञ्च न ॥

---

(7) उपगोरिदं औपगवम् Pertaining to Upagoo.

(8) अग्नीधः शरणं आग्नीध्रम् a sanctuary of the person
रण्
who performs the sacrifice.

(9) समिधां आधानः सामिधेन्यः a hymn with which an
षेण्यण्
offering is made. सामिधेनी (Feminine)

(a) तव इदं तावकं तावकीनम् Pertaining to you
खञ्
(b) मम इदं मामकं मामकीनम् Pertaining to me } Singular
खञ्

(c) यौष्माकं यौष्माकीणम् Pertaining to you } dual or
(d) आस्माकं आस्माकीनम् pertaining to us } plural

Note:—(a) to (d) illustrate no, (7)

(10) (*a*) अश्मनो विकारः आश्मनः or आश्मः made of or compounded of.

(*b*) मयूरस्य विकारः अवयवो वा मायूरः made of Mayoora or a number or portion of Mayoora.

यथा ॥ अश्ममयम् ॥ आश्मनम् ॥ इत्यादि ॥ जातुषम् ॥ त्रापु-
षम् ॥ शामीलम् ॥ शामीली ॥ स्रुक् ॥ नित्यमयडन्तो यथा ॥
ष्लञ्
आम्रमयम् ॥ शरमयम् ॥ त्यङ्मयम् ॥ वाङ्मयम् ॥ इत्यादि ॥ गोः
पुरीषं गोमयम् ॥ एण्याः ऐणेयम् ॥ एणस्य ऐणम् ॥ गव्यम् ॥
ढञ्
पयस्यम् ॥ इत्यादि ॥

विकारावयवार्थस्य लुका लोपः फले स्मृतः ।
पुक्षादिभ्यस्तु शब्देभ्यः फलेप्येष न लुप्यते ॥

आमलक्याः फलं आमलकम् ॥ इत्यादि ॥ इक्षादेः फलं

मूर्वा मौर्वः made of Moorva (plants) a portion of such plants.

पिप्पल- पैप्पलः made of Pippala tree or a number or portion of Pippala trees.

अश्ममयं आश्मनम् The termination मयट् is also used sometimes. But these derivatives do not denote eatables or articles of clothing.

जतु sealing wax. त्रपु lead. शमी a tree. जातुषम् त्रापुषम् शामीलं made of or pertaining to जतु त्रपु or शमी.

आम्रमयम् made of Mango tree or a part of the tree itself. शरमयम् made of reeds (शर).

(c) गोः पुरीषं गोमयम् The feaces (urine & dung) of cows.

(d) एणी deer- ऐणेयम् skin &ce of deer (Feminine). एण deer. ऐणम् skin &c of deer (Masculine). गव्यम् Pertaining to गो; viz Milk &ca. पयस्यम् Pertaining to milk viz, curd &ca.

(e) आमलक्याः फलं आमलकम् a kind of berries. When the derivative means a fruit, the termination is dro-

प्लाक्षम् ॥ नैयग्रोधम् ॥ ऐंगुदम् ॥ जम्ब्वाः फलं जम्बूः जम्बु जाम्बवम् ॥

शुष्काः पाकेन ये तेषां फलप्रत्ययलुब्भवेत् ॥
प्रकृतेर्लिंगवचने लुपा लोपो यदा भवेत् ॥

यथा ॥ व्रीहीणां फलानि व्रीहयः ॥ मुद्गानां फलानि मुद्गाः ॥

पुष्पमूलेषु वाच्येषु प्रायेण लुबयं भवेत् ॥

मल्लिकायाः पुष्पं मल्लिका ॥ जाती ॥ विदार्याः मूलं विदारी ॥ क्वचिन्नलुप् ॥ पाटलानि पुष्पाणि ॥ साल्वानि मूलानि ॥

पुष्पमूलप्रत्ययानां लुका लोपः क्वचिद्भवेत् ॥

अशोकस्य पुष्पं अशोकम् ॥ करवीरम् ॥

हरीतक्यादिषु फलप्रत्ययोलुप्यते लुपा ॥
लिंगमेव प्रकृतिवत् वचनं तु यथायथम् ॥

यथा ॥ हरीतक्याः फलानि हरीतक्यः ॥

---

pped. *Exception* प्लाक्षम् Pertaining to Plaksha नैयग्रोधम् Pertaining to the tree Nyagrodha. ऐंगुदं Pertaining to the tree Inguda. जम्ब्वाः फलं जम्बूः जम्बु जाम्बवम् These three forms signify a kind of fruit, jamboo. (1) व्रीहयः a kind of grain also plant. (2) मुद्गाः a kind of grain also plant. (3) मल्लिका flower of the creeper Mallika also the creeper. (4) जाती flower of the creeper jati also the creeper. (5) विदारी root of the plant vidari also the plant vidari. *Note*:—When acorns and grains are denoted by the derivative, the termination is dropped; and the word retains the Gender and Number of the base as in (i to v). पाटलानि Patala flowers. साल्वानि Roots of Salwa trees. अशोकस्य पुष्पं अशोकम् Asoka flower. करवीरम् Karavira flower. हरीतक्याः फलानि हरीतक्यः a kind of berries(கடுக்காய்).

सप्तम्यन्तप्रकृतिका यथा ॥

भ्राष्ट्रे संस्कृताः भ्राष्ट्राः ॥ अष्टसु कपालेषु संस्कृतः अष्टाकपालः ॥ शूले शूल्यम् । उखायां उख्यम् । दध्नि दाधिकम् । उदश्विति औदश्वितम् । औदश्वित्कम् । क्षैरेयम् ॥
ठक् ढञ्

सर्वत्रेह विशेष्यस्य भक्ष्यत्वं तु नियम्यते ॥
क्षैरेयीयं यवागूरित्यभक्ष्येऽपि प्रयोगतः ॥

स्रुघ्ने जातः स्रौघ्नः । प्रावृषि प्रावृषिकः । शारदकाः दर्भविशेषाः मुद्गविशेषाश्च । पूर्वाह्णकः । अपराह्णकः । आर्द्रकः । मूलकः । प्रदोषकः । अवस्करकः । पथि जातः पन्थकः । अमावास्यकः । अमावास्यः । श्रविष्ठः । फल्गुनः । अनूराधः । स्वातिः । तिष्यः । पुनर्वसुः । हस्तः । विशाखः । अषाढः । बहुलः ॥
ठप् वुञ् वुन् वुन् वुन् वुन् वुन् अ

जातार्थस्येह सर्वत्र लुका लोपोऽवधार्यताम् ॥

• Locative base.

(1) भ्राष्ट्रे संस्कृताः भ्राष्ट्राः Prepared in Brashtra (vessel) • Eatables अष्टसु कपालेषु संस्कृतः अष्टाकपालः Prepared in 8 vessels viz पुरोडाश. शूले शूल्यम् fried by means of a Sooia.
यत्

(2) स्रुघ्ने जातः स्रौघ्नः Born in or produced in the country Srughna. प्रावृषिकः Produced in the rainy season.
ठप्
शारदकाः Produced in Sarad season. पूर्वाह्णकः Produced in the early part of the day.
वुञ् वुन्
श्रविष्ठायां जातः श्रविष्ठः Born under the constellation of Sravishta [Mascu-

स्त्रियां चित्रारेवतीभ्यां रोहिण्या अपि लुग्भवेत् ॥

यथा ॥ चित्रायां जाता चित्रा । रेवती । रोहिणी । फल्गुन्यां जाता फल्गुनी । अषाढा । श्राविष्ठीयः । आषाढीयः । गोस्थाने
छण् छण्
जातः गोस्थानः । गोशालः । खरशालः । वत्सशाले । वात्सशालः । वत्सशालः । आभिजितः । अभिजित् । आश्वयुजः । अश्वयुक् । शातभिषजः । शातभिषः । शातभिषक् । रोहिणः । रौहिणः । स्रुघ्ने कृतः लब्धः क्रीतः कुशलः वा स्रौघ्नः । स्रुघ्ने प्रायेण भवति स्रौघ्नः । उपजानु प्रायेण भवति औपजानुकः । औपकर्णि-
ठक् ठक्
कः । औपनीविकः ॥ स्रुघ्ने सम्भूतः स्रौघ्नः । कोशे सम्भूतं
ठक्
कौशेयम् । हेमन्ते साधुः हैमन्तः प्रावारः । वसन्ते पुष्प्यन्ति
ढञ्

---

line) चित्रायां जाता चित्रा Born under the constellation of Chitra. Feminine.

Note.—When the base denotes a star or constellation the termination is dropped.

(3) स्रुघ्ने कृतः लब्धः क्रीतः कुशलः वा स्रौघ्नः means respectively made in, obtained in, purchased in or skilled in the Srughna country.

(4) स्रुघ्ने प्रायेण भवति स्रौघ्नः Found in abundance in Srughna.

(5) स्रुघ्ने सम्भूतः स्रौघ्नः Produced in plenty in Srughna.
कोशे कौशेयम् Produced by Kosa; viz. Silk.

(6) हेमन्ते साधुः हैमन्तः adopted to the dewy season, viz. Blankets.

(7) वसन्ते पुष्प्यन्ति वासन्त्यः creepers that blossom in Vasantha season.

वासन्त्यः । शरदि पच्यन्ते शारदाः शालयः ॥

साधु पुष्यत्पच्यमानेष्वेषु स्युः कालवाचकात् ॥
तथैवोप्ते देयमृणे व्याहारे चापि तादृशात् ॥

यथा । हेमन्ते उप्ताः हैमन्ताः यवाः । आश्वयुज्यां उप्ताः आ-
श्वयुजकाः वुञ्
माषाः । ग्रीष्मे उप्यन्ते ग्रैष्मकाः । ग्रैष्माः ।
वुञ्
वासन्तकाः वासन्ताः । मासे देयं ऋणं मासिकम् । निशायां व्या.
वुञ् ठञ्
हरति नैशः । नैशिकः । मृगः विशेष्यः । स्रुघ्ने भवः स्रौघ्नः ।
ठक्
दिश्यम् । स्वर्ग्यम् । दन्त्यम् । कण्ठ्यम् । एवं अन्यशरीरावयवे-
यत् यत् यत् यत्
भ्योऽपि द्रष्टव्यम् ॥

कलश्यां भवः कालशेयः । एवं कौक्षेयम् । वास्तेयम् । आहे-
ढञ् ढञ् ढञ् ढञ्
यम् । ग्रैवेयम् । ग्रैवम् । गम्भीरे भवं गाम्भीर्यम् । अव्ययीभा-
ढञ् अण् ञ्यः
वादप्येवम् ॥ परिमुखं भवं पारिमुख्यम् । आभिमुख्यम् । क्वचिन्न ।
ञ्यः ञ्यः

---

(8) शरदि पच्यन्ते शारदाः The corns that flourish in Sarad season.

(9) हेमन्ते उप्ताः हैमन्तः The corn that grows in Hemanta season.

10)) मासे देयं ऋणं मासिकम् Debt due by the month.

(11) नैश: of नैशिकः an animal that delights during nights.

(12) स्रुघ्ने भवः स्रौघ्नः Being or living in the Srughna country. दन्त्यम् Pertaining to teeth. कण्ठ्यम् Pertaining
यत्
to throat. पारिमुखं भवं पारिमुख्यम् appearing around the face.
ञ्य

Avyayibhava compounds. आभिमुख्यम् appearing

औपकूलम् । अन्तर्वेशं भवं आन्तर्वेशिकम् । आन्तर्गणिकम् ।
ठञ् ठञ्
आध्यात्मिकम् । एवम् ॥ आधिदैविकम् । आधिभौतिकम् । ऐ-
ठञ् ठञ् ठञ्
हलौहिकम् । पारलौकिकम् । पारिग्रामिकम् । आनुग्रामिकम् ।
ठञ् ठञ् ठञ् ठञ्
जिह्वामूलीयम् । अंगुलीयम् । कवर्गीयम् । वर्णम् । अशब्देतु ।
छः छ छ
मद्वर्ग्यः मद्वर्गीणः । मद्वर्गीयः ॥
यत् ख छ

साधारणाः केचन स्युर्जाताद्यर्थेषु केषु चित् ॥

यथा ॥ राष्ट्रे जातः कृतः लब्धः क्रीतः कुशलः सम्भूतः भवः राष्ट्रा
दागतं इत्यादि । यथासम्भवं विग्रहः कर्त्तव्यः । राष्ट्रियः । अवारीणः ।
घः ख
पारीणः । अंत्रारंपारीणः । पारावारीणः । ग्राम्यः । ग्रामीणः ।
ख ख ख य खञ्
ग्रामेयकः । कुत्सितास्त्रयः । कवयः । तत्र जातादिः । कात्रेयकः ।
ढकञ् ढकञ्
नागरेयकः । नादेयम् । माहेयम् । दक्षिणा इत्यव्ययम् । दा-
ढकञ् ढञ् ढञ्
क्षिणात्यः । पाश्चात्यः । पौरस्त्यः । कापिश्यां जातं कापिशायनम् ।
त्यक् त्यक् त्यक् ष्फक्

---

towards or around the face. आध्यात्मिकम् produced or appearing within [the body] आधिदैविकम् produced by God or creator. आधिभौतिकम् produced by the Elements. Thathpurusha compounds ऐहलौकिकम् produced in or obtainable in this world. पारलौकिकम् produced in or obtainable in the other world. जिह्वामूलीयम् produced
छ
by the root of the tongue. राष्ट्रे जातः इत्यादि राष्ट्रियः=इय= produced in the Rashtra, country &ca. ग्राम्यः ग्रामीणः

मधु । कापिशायनी । द्राक्षा । दिविभवं दिव्यम् । एवं प्राच्यम् ।
यत्
यत्
अवाच्यम् । उदीच्यम् । प्रतीच्यम् । अमाभवः अमात्यः । एवं
यत्
यत्
त्यप्
इहत्यः । कुत्यः । ततस्त्यः । तत्रत्यः । औपरिष्टः । आरातीयः ।
छः
आरण्याः । सुमनसः । दूरादागतः दूरेत्यः । उत्तरादागतः औत्तराहः ।
एत्य
आहञ्
ऐषमस्त्यम् । ऐषमस्तनम् । एवं ह्यस्त्यम् । ह्यस्तनम् । श्वस्त्यम् ।
त्यप्
ट्यु
शौवस्तिकम् । पूर्वस्यां शालायां । भवः पौर्वशालः । एवं पौर्वमद्रः ।
ठञ्
ञः
आपरमद्रः । शालीयः । मालीयः । भावत्कम् । भवदीयम् । आप-
छ
छ
ठक्
छस्
त्कालिकी । आपत्कालिका । नागरकः । चोरः शिल्पी वा । नागरः ।
ठञ्
ञिठ
वुञ्
ब्राह्मणः । आरण्यकः । पन्थाः । अध्यायः न्यायः मनुष्यः विहारः ।
हस्ती वा । मुखतः भवं मुखतीयम् । पार्श्वतीयम् । जनकीयम् ।
छ
छ
छ

ग्रामेयकः produced in the village. दाक्षिणात्यः produced or born in the south. पाश्चात्यः produced or born in the West. पौरस्त्यः produced or born in the East. कापिश्यां जातं कापिशायनम् मधु wine (Neuter), कापिशायनी द्राक्षा creeper (Feminine). दिव्यम् produced or born in Swarga. प्राच्यम् produced or born in the East. प्रतीच्यम् produced or borns in the West. अमात्यः staying near, viz, Minister इहत्यः staying or living here. कुत्यः wherefrom coming. आरण्याः-सुमनसः flowers growing in forests. दूरेत्यः come from a distance. औत्तराहः come from the northern country. पूर्वस्यां शालायां भवः पौर्वशालः residing in the eastern portion. नागरकः चोरः Thief. नागरः ब्राह्मणः Brahman.

परकीयम् । राजकीयम् । पर्वतीयः । मनुष्यः । अन्यत्र पर्वतीयानि
छ छ छ छ
पार्वतानि वा । फलानि । तव मम वा इदं त्वदीयम् मदीयम् । ता-
अण् छ छ
वकम् । मामकम् । तावकीनम् । मामकीनम् । युवयोः आवयोः यु-
खञ् खञ्
ष्माकम् । अस्माकम् वा इदमित्यादि युष्मदीयम् । अस्मदीयम् ।
छ छ
यौष्माकम् । आस्माकम् । यौष्माकीणम् । आस्माकीनम् । अर्ह्यम् ।
खञ् खञ् यत्
एवं परार्ह्यम् । अवरार्ह्यम् । अधमार्ह्यम् । उत्तमार्ह्यम् । पौ-
ठञ् म अ
र्वार्धिकम् । पूर्वार्ध्यम् । मध्ये । मध्यमम् । मध्यो वैयाकरणः । उ-
त्कर्षापकर्षहीनइत्यर्थः ॥ मध्यम् । दारु । नातिदीर्घम् नातिह्र-
अ
स्वमित्यर्थः । द्वैप्यम् ॥
यञ्

जाताद्यर्थेषु ठञ् कालादिशेषविहितं विना ॥

मासिकम् । सांवत्सरिकम् । सायंप्रातिकम् । पौनःपुनिकम् ।
इत्यादि ॥ विशेषविहिता यथा ॥ नैशिकम् नैशम् । प्रादोषिकम्
ठञ् ठञ्
प्रादोषम् ॥

आरण्यकः forest track or path. राजकीयम् pertaining to the king. पर्वतीयः one living in the mountains. पर्वतीयानि पार्वतानि fruits produced in the hills. मध्ये भवं मध्यमम् middling or coming between. मध्यः वैयाकरणः a Grammarian of middling capacity. मध्यम् neither long nor short (tree) द्वैप्यम् produced in the island. मासिकम् occuring in the month. सांवत्सरिकम् occuring in the year. सायंप्रातिकम् occuring both in the morning and evening. पौनःपुनिकम् occuring frequently. नैशिकम् or नैशम् occuring during nights. प्रादोषिकम् प्रादोषम् occuring in the evenings

अणेव सन्धिवेलादि ऋतुनक्षत्रवाचिनाम् ॥

यथा ॥ सान्धिवेलः । ग्रैष्मः । तैषः ॥

सन्धिवेला च सन्ध्या च त्वमावास्या त्रयोदशी ।
चतुर्दशी पञ्चदशी प्रतिपत्पौर्णमास्यपि ॥

एषां सान्ध्यः । इत्यादि ॥ शारदिकम् । श्राद्धम् । शारदिकः ।
ठञ्

शारदः । रोगः आतपो वा ॥ सांवत्सरम् । फलं पर्व वा । सांवत्स-
अण्

रिकम् । अन्यत् । प्रावृषेण्यः । वार्षिकम् । हैमनम् । हैमन्तम् । सा-
ठञ् एण्यः ठक्

यन्तनम् । चिरन्तनम् । एवं प्राह्णेतनम् । प्रगेतनम् । दोषातनम् ।
ट्यु ट्यु

इत्यादि ॥ चिरत्नम् । परुत्नम् । परारित्नम् । अग्रिमम् । आदिमम् ।
त्न त्न त्न डिमच् डिमच्

पाश्चिमम् । आन्तिमम् । पूर्वाह्णेतनम् । पौर्वाह्णिकम् । अपराह्णेतनम् ।
डिमच् डिमच् ट्यु ठञ् ट्यु

सन्धिवेलायां भवः सान्धिवेलः happening in the evenings. सान्ध्यः same as above. शारदिकम् sradha ceremony occuring in Sarad season. शारदिकः or शारदः Disease generated in that season or sun shine. सांवत्सरिकम् that which befalls once during the year. सांवत्सरम् benefits derived during the year. प्रावृषेण्यः produced during the raining season. वार्षिकम् produced during the rainy season. सायन्तनम् produced in the evening. चिरन्तनम् produced from a long time. चिरत्नम् see above परुत्नम् produced last year. परारित्नम् produced the year before last. अग्रिमम् that which is in front. आदिमम् that which was in the very beginning. पाश्चिमम् that which is in the last. आन्तिमम् that which is in the end. पूर्वाण्हेतनम् produced in the fore-noon. पौर्वाण्हिकम् produced in the fore-noon. अपराण्हेतनम् produced in the afternoon. आपरा-

आपराह्णिकम् ॥ इत्यणधिकारताद्धिताः ॥
ठञ्

अथ ठगधिकारताद्धिताः ॥

इह सर्वत्र सर्वाभ्यः ठक् स्यादैशेषिकं विना ॥
अधस्ताल्लिखनेनैव विशेषा अपि सुग्रहाः ॥

तत्र प्रथमान्तप्रकृतिका यथा ॥ अपूपः पण्यं अस्य आपूपिकः । लावणिकः । किसरिकः । किसरिकी । मृदंगवादनं शिल्पं अस्य मा-
ठञ् ष्ठन्

र्दङ्गिकः । असिः प्रहरणं अस्य आसिकः । धानुष्कः । पारश्वधिकः ।
शाक्तीकः । याष्टीकः अस्तिपरलोक इति मतिरस्य । आस्तिकः ।
ईकक् ईकक्

ण्हिकम् produced in the after-noon.

This closes Anadhikara Thathitha.

Tagadhikara Tadhitas.

This begins the class of words in which ठक् (इक) is the termination.

The exceptions will be noted under each head.

Nominative base.

(1) आपूपिकः अपूपः पण्यं अस्य a dealer in Apoopa (cakes) लावणिकः लवण पण्यं अस्य a dealer in salt.

(2) मार्दङ्गिकः मृदंगवादनं शिल्पं अस्य one who plays on Mridanga (Drum).

(3) आसिकः असिः प्रहरणं अस्य armed with sword. धानुष्कः धनुः प्रहरणं अस्य armed with bows. पारश्वधिकः परश्वधः प्रहरण अस्य armed with axe. Exception:—शाक्तीकः शक्तिः प्रहरणं अस्य armed with sakthi. (weapon). ईकक् Exception. याष्टीकः यष्टिः प्रहरणं अस्य armed with a stick or club. ईकक्.

(4) आस्तिकः अस्ति परलोक इति मतिरस्य one believing in-

नास्तिकः । दैष्टिकः । अपूपभक्षणं शीलं अस्य अपूपिकः । अग्र-भोजनं नियतं दीयते अस्मै आग्रभोजनिकः । श्राणा नियतं दीयते अ-स्मै श्राणिकः । श्राणिकी । मांसौदनिकः । मांसिकः । ओदनिकः ॥
टिठन् टिठन् टिठन् टिठन्
भाक्तः । भाक्तिकः ॥

द्वितीयान्तप्रकृतिका यथा ॥

माशब्दमाह माशब्दिकः । प्रभूतमाह प्राभूतिकः । सुस्नातं पृ-च्छति सौस्नातिकः । सौखशायनिकः । परदारान् गच्छति पारदा-

---

the existence of another world. नास्तिकः नास्ति—one who does not believe in the existence of another world; atheist. दैष्टिकः दिष्टमिति मतिरस्य one who believes in the existence of Fate; a fatalist.

(5) आपूपिकः अपूप भक्षणं शीलं अस्य fond of Apoopa or cakes. छात्रः छत्रं शीलं अस्य one who keeps back the faults or defects of his teacher or preceptor; a student.

(6) आपूपिकः अपूप भक्षणं हितं अस्मै one to whom Apoo-pa (cake) is salutary.

(7) आग्रभोजनिकः अग्रभोजनं नियतं दीयते अस्मै one to whom the first meal is given. श्राणिकः one who takes gruel or Kanji or to whom gruel is given. मांसौदनिकः one who takes rice along with flesh. मांसिकः one who eats flesh. ओदनिकः one who eats rice. भाक्तः भाक्तिकः one who eats rice.

Accusative base.

(1) माशब्दिकः माशब्दमाह giving utterance to Ma or No. प्राभूतिकः प्रभूतमाह giving utterance to a great deal.

(2) सौस्नातिकः सुस्नातं पृच्छति questioning the welfare of a healthy bath. सौखशायनिकः सुखशयनं पृच्छति question-ing the welfare of a sound sleep.

(3) पारदारिकः परदारान् गच्छति loving or approaching others' wives.

रिकः । शब्दं करोति शाब्दिकः । दार्दुरिकः । पक्षिणो हन्ति पा-
क्षिकः । शाकुनिकः । मायूरिकः । मात्स्यिकः । मैनिकः । शाकु-
लिकः । मार्गिकः । हारिणिकः । सारङ्गिकः । पूर्वपदं गृह्णाति पौर्व-
पदिकः । औत्तरपदिकः । धर्मं चरति धार्मिकः । आधर्मिकः । स-
मवायान् समवैति सामवायिकः । सामाजिकः । पारिषद्यः । सैन्यः ।
ण्यः ण्यः
सैनिकः । संज्ञायां । ललाटं पश्यति लालाटिकः । कुक्कुटीपतनार्ह-
देशं पश्यति कौक्कुटिकः । भिक्षुः ॥

---

(4) शाब्दिकः शब्दं करोति making noise. दार्दुरिकः दर्दुरं करोति creating difficulties or obstacles.

(5) पाक्षिकः पक्षिणो हन्ति killing birds. शाकुनिकः शकुनान् killing birds. मायूरिकः मयूरान् killing Mayoora birds. मा-त्स्यिकः मत्स्यान्, मैनिकः मीनान्, शाकुलिकः शकुलान, -klling fish. मा-र्गिकः मृगान्, हारिणिकः हरिणान्, सारंगिकः सारंगान, -killing deer.

(6) पौर्वपदिकः पूर्वपंद गृह्णाति Adhering to the preced-ing word or step.

(7) धार्मिकः धर्मञ्चरति Following Dharma or good conduct. आधर्मिकः अधर्मञ्चरति Addicted to evil conduct or bad ways.

(8) सामवायिकः समवायान् समवैति joining a company or society. पारिषद्यः परिषदः समवैति joining a society. सैन्यः सैनिकः सेनां समवैति joining an army.

(9) लालाटिकः ललाटं पश्यति observing the features or signs of his master but being unfit to do any work; servant. कौक्कुटिकः कुक्कुटीपतनार्हदेशं पश्यति Looking eagerly to such a spot of ground as is covered by the feet of the cock; a poor man; beggar.

तृतीयान्तप्रकृतिका यथा ॥

अक्षैर्दीव्यति आक्षिकः । अभ्रचा खनति आभ्रिकः । अक्ष्णा जयति आक्षिकः । अक्ष्णा जितं आक्षिकम् । दध्ना संस्कृतं दाधिकम् । उडुपेन तरति औडुपिकः । गौपुच्छिकः । नाविकः । घटिकः ।
ठञ् ठन् ठन्

बाहुकः । हस्तिना चरति हास्तिकः । शाकटिकः । दध्ना चरति दाधिकः । वेतनेन जीवति वैतनिकः । वास्त्रिकः । क्रयविक्रयिकः ।
ठन् ठन् ठन् ठन्

क्रायिकः । विक्रयिकः । आयुधीयः । आयुधिकः । उत्संगेन
ठन् ठन् छः ठन्

Instrumental base.

(1) आक्षिकः अक्षैर्दीव्यति playing with Aksha; chess player.

(2) आभ्रिकः अभ्रया खनति Digging with a crowbar house-breaker.

(3) आक्षिकः अक्ष्णा जयति conquering by force of sight (Masculine).

(4) आक्षिकं अक्ष्णा जितं overcome by force of sight

(5) दाधिकं दध्ना संस्कृतं Prepared with curd.

(6) औडुपिकः उडुपेन तरति crossing by means of aboat; Udupa. गौपुच्छिकः गोपुच्छेन crossing by means of a cow tail. नाविकः नावा crossing by means of a ship. घटिकः घटेन crossing by means of a pot. बाहुकः बाहुभ्यां swimming across by means of hands.

(7) हास्तिकः हस्तिना चरति Riding on an elephant; rider thereon. शाकटिकः शकटेन चरति travelling in a cart or chariot. दाधिकः दध्ना चरति living with the help of curd.

(8) वैतनिकः वेतनेन जीविति living by cooly woork; cooly worker.

हरति औत्सङ्गिकः । भस्त्रिकः । भस्त्रिकी । विवाधिकः वैवाधिकः ।
ष्ठन् ष्ठन्

अक्षद्यूतेन निर्वृत्तं आक्षद्यूतिकम् । वैस्म् । कृत्या निर्वृत्तं कृत्रिमम् ।
मप्

पाक्रिमम् । पाकेन पाकिमम् । त्यागिमम् । अपमित्य निर्वृत्तं आपमि-
मप् इमप् इमप् कन्

त्यकम् । याचितेन याचितकम् । दध्ना संसृष्टं दाधिकम् । चूर्णेन
कन् कन्

संसृष्टाः चूर्णिनः । अपूपाः । लवणेन संसृष्टः लवणः । सूपः ।
इन् लुक्

लवणम् । शाकम् । मौद्गः । ओजसा वर्त्तते औजसिकः । शूरः ।
लुक् अण्

साहसिकः । चोरः । आम्भसिकः । मत्स्यः । चतुर्थीपञ्चमीषष्ठी-
प्रकृतिका न सन्ति ॥

सप्तम्यन्तप्रकृतिका यथा ॥

आकरे नियुक्तः आंकरिक्तः । दैवागारिकः । श्मशाने अधीते श्मा-

---

(9) औत्संगिकः उत्संगेन हरति bearing or carrying away in ones lap.

(10) आक्षद्यूतिकं अक्षद्यूतेन निर्वृत्तं enmity arising out of chess-play.

(11) दाधिकं दध्ना संसृष्टं mixed with curd .

(12) चूर्णिनः चूर्णेन संसृष्टाः mixed with choorna (powder); cake (Apoopa). लवणः लवणेन संसृष्टः mixed with salt or seasoned with salt.

(13) औजसिकः ओजसा वर्त्तते a warrior; one who maintains his position by force. साहसिकः सहसा वर्त्तते a thief. आम्भसिकः अम्भसा वर्त्तते a fish.

Dative, Ablative and *Genitive*—Nil.

Locative Base.

(1) आकरिकः आकरे नियुक्तः one set to watch the Ruby

शानिकः । चतुर्दश्यां अधीते चातुर्दशिकः । निकटे वसति नैकटिकः । भिक्षुः । आवसथे वसति आवसथिकः ॥

इति ठगधिकारताद्धिताः ॥

यत्प्रत्ययाधिकारस्थाः कथ्यन्तेथाद्य तद्धिताः ।
यत्स्यात्सर्वत्र सर्वाभ्यो विशेषविहितं विना ॥

पदमस्मिन् दृश्यं पद्यः ! कर्दमः । मूलमेषामावर्हि मूल्याः मुद्गाः । आवर्हि उत्पाटनवत् ॥ रथं वहति रथ्यः । युग्यः । प्रासंग्यः । धुरं वहति धुर्यः । धौरेयः । सर्वधुरां वहति सर्वधुरीणः ।
ढक् ख

-store, the place where Rubies are produced. दैवागारिकः देवागारे नियुक्तः a temple servant.

(2) श्मशाने अधीते श्माशानिकः one who studies in the burning gronnd, (Smasana). चातुर्दशिकः चतुर्दश्यां अधीते one who studies on the 14th day of a Paksha.

(3) नैकटिकः निकटे वसति one who is always near आवसथिकः आवसथे one who is always at home.

This closes the Takathikara.

This begins the Yathathikara.

Nominative Base.

(1) पद्यः पदं अस्मिन् दृश्यं That in which the impression of the foot is visble. कर्दमः mire.

(2) मूल्याः मूलं एषां आवर्हि The corn whose stalks are removed with the root. मुद्गाः green peas or their plants.

Accusative Base.

(1) रथ्यः रथं वहति Bearing or drawing the car horse. युग्यः युगं Bearing the yoke; bullock. प्रासंग्यः प्रासंगं Bearing the yoke. धुर्यः or धौरेयः धुरं Bearing the burden; सर्वधुरीणः सर्वधुरां Bearing all burden or load. एकधुरीणः or

एकधुरीणः । एकधुरः । हलं वहति हालिकः । सैरिकः । पादौ
ख लुक् ठक् ठक्
विध्यन्ति पद्याः । शर्कराः । धनं लब्धा धन्यः । गण्यः ।
आन्नः । वशं गतः वश्यः । नावा तार्यं नाव्यम् । वयसा तुल्यः व-
यस्यः । धर्मेण प्राप्यं धर्म्यं । विषेण वध्यो विष्यः । मूलेन आ-
नाम्यं मूल्यं । मूलेन समो मूल्यः । सीतया समितं सीत्यं । तुल-
या सम्मितं तुल्यम् । छन्दसा निर्मितं छन्दस्यम् । उरसा निर्मितः

एकधुरः एकधुरां Bearing only one burden or load. हालिकः हलं वहति, सैरिकः सीरं वहति Drawing the plough; Bullock.

(2) पद्याः शर्कराः (stones.) पादौ विध्यन्ति Padya-stones which injure the feet.

(3) धन्यः धनं लब्धा one who has obtained wealth. a rich man. गण्यः गणं one who commands a crowd or-gang. आन्नः अन्नं one who has secured food.

(4) वश्यः वशं गतः obedient.

Instrumental Base.

(1) नाव्यं नावा तार्यम् crossed by a ship.

(2) वयस्यः वयसा तुल्यः an equal by age; a friend.

(3) धर्म्यम् धर्मेण प्राप्यं Securable by good conduct or Tharma.

(4) विष्यः विषेण वध्यः Destroyed by poison or kill ed by poison.

(5) मूल्यं मूलेन आनाम्यं Bending from the very root

(6) मूल्यः मूलेन समः proper price or value.

(7) सीत्यं सीतया समितं Levelled by ploughing; of even surface.

(8) तुल्यं तुलया सम्मितं weighed by scales; equal in weight.

(9) छन्दस्यं छन्दसा निर्मितं Produced or caused by Chandus [Veda].

औरसः । उरस्यः ॥
अण्

चतुर्थ्यन्तप्रकृतिकानेव सन्त्यत्र तद्धिताः ।

धर्मादनपेतं धर्म्यम् । पथोनपेतं पथ्यम् । अर्थादनपेतं अर्थ्यम् । न्याया-
दनपेतं न्याय्यम् । हृदयस्य प्रियः हृद्यः । मतस्य करणं मत्यम् । जनस्य
जल्पः जन्यः । हलस्य कर्षः हल्यः । सामसु साधुः सामन्यः । अग्रच्यः ।
कर्मण्यः । शरण्यः । प्रातिजनं साधुः प्रातिजनीनः । एवं सांयुगी
खञ्
खञ्
नः । सार्वजनीनः । वैश्वजनीनः । भक्ते साधवः भाक्ताः । शाल-
खञ्
खञ्
अण्

---

(10) उरस्यः or औरसः उरसा निर्मितः Begot by oneself; ones own son.

Dative:—*Nil.*

Ablative Base.

(1) धर्म्यं धर्मादनपेतं Undiverted from good conduct; (Dharma). पथ्यं पथोनपेतं Undeviating from the right path. अर्थ्यम् अर्थादनपेतं Unerring from the right sense; material. न्याय्यं न्यायादनपेतं Undeviating from Nyaya; just; proper.

Genitive Base.

(1) हृद्यं हृदयस्य प्रियं Dear to ones heart.

(2) मत्यं मतस्य करणं Doing according to ones will or pleasure.

(3) जन्यः जनस्य जल्पः Talk among people; rumour.

(4) हल्यः हलस्य कर्षः a furrow left by a plough-share (Hala.)

Locative Base.

(1) सामन्यः सामसु साधुः Skilled in Sama Veda. अग्रच्यः अग्रे साधुः Skilled in going before or advancing in front. कर्मण्यः कर्मणि साधुः Skilled in work. शरण्यः शरणे साधुः Skilled in giving protection. प्रातिजनीनः प्रतिजनं साधुः good

यः । पारिषद्यः पारिषदः । कथायां काथिकः । गुडे गौडिकः ।
ण्यः ण ठक् ठक्
इक्षुः । साक्तुकः । यवः । पथि साधु पाथेयम् । आतिथेयम् ।
ठञ् ढञ् ढक्
वसतिः वसनं तत्र साधुः वासतेयी । रात्रिः । स्वापेयम् । धनं । स-
ढञ् ढञ्
भायां साधुः सभ्यः । समाने तीर्थे वसतीति सतीर्थ्यः । समानोदरे
यः
शयितः समानोदर्यः । सोदर्यः ॥ इति यदधिकारीयाः ॥
यत् यत्

छयतोरधिकारेऽथ कथ्यन्ते तद्धिता इह ।
उवर्णान्तगवाद्योर्यच्छोऽन्येषां विहितं विना ॥

प्राकारः आसां इष्टकानां स्यात् प्राकारीयाः इष्टकाः । प्रासा-

---

to every person. सार्वजनीनः सर्वजने साधुः good to all persons. भाक्तः शालयः भक्ते साधवः Rice fit to be cooked; good rice. काथिकः कथायां साधुः Skilled in relating stories or story telling. गौडिक; गुडे साधुः Sugar fit for jaggery or sugar. पाथेयं पथि साधु Food taken while proceeding on a journey. आतिथेयं अतिथौ साधु Hospitable to guests. स्वापतेयं धनं स्वपतौ साधु That which conduces to master's comfort; wealth. सभ्यः सभायां साधुः fit for Society.

(2) सतीर्थ्यः समाने तीर्थे वसतीति one who studies under the same teacher.

(3) समानोदर्यः or सोदर्यः समाने उदरे शयितः one come from the same womb; brother.

This closes the Yathadhikara.

This begins the Cha or Yath terminations.

Note:—The particle यत् comes after words ending in उ and गो &c; and छ after the rest: subject to certain exceptions.

